॥ सात्वतसिध्दांतशतकप्रारंभः॥ पत्रे ८४ समग्र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा·श·
१

श्रीकृष्णाय नमः यद्विश्वाद्यमनाद्यमागमगिरामाम्नायमापाद्यते पश्चाद्यैरपि विद्यया स्वरचैरद्यापि
नाम्नायते स्नेहाद्वृन्दरवालिकाभिरभितः श्रीमाञ्जगद्दुर्लभः सोयं चिद्घनविग्रहो हरिरहो वर्वर्त्ति हृद्दात्मने
श्रीमत्सावन्तसिद्धान्तशतकं स्वकृतं स्वयं व्याकुर्मः शर्मणे स्नेहाद्भक्तिमाजां समासतः २ इह खलु स्वग्रंथ

श्रीकृष्णाय नमः विश्वाकारोऽविकारः स्थिरतरजगतामीश्वरोऽजो विहारः क्षोणीभारापहारः प्रभवजलनिधेः पालिताकर्णधारः इत्यादिप्रार्थनाभिः प्रकटितपरमानन्दचित्सान्द्रदेहो देवक्याः प्रादुरासीत विश्वरिव स विभुः स्वैरलीलावतारः १

प्रारंभं मंगलान्वितविघ्नविघातनाय द्रढीरद्रढीमत्वायग्रहागारस्मरणतद्रूत्स्मरसंसारसागरस्तरनिकरनिस्तारविस्ता राम·
रितचिदानंदाकारश्रीकृष्णावतारप्रादुर्भावप्रकाररूपंगलमाचरति विश्वाकार इत्यादिना छेनपद्येनानन्दविभुः १

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रीविष्णुर्देवक्यां प्रादुरासीदित्यन्वयः कथं तदाह ब्रह्मादीनां देवानां प्रार्थनाभिः किं करिष्यन् क्षोणीभा
रमपहरन्नपहरिष्यन्नित्यर्थः । स विष्णुः स्वामी देवर्नमानश्चयोगः । स कीदृशो विष्णुः साकारो यस्य सः । सर्वं ख
ल्विदं ब्रह्म तज्जलानिति श्रुतेः । ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च । नद्यः समुद्रा
श्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य इति स्मृतेश्च । विकारी च स स्यान्नेत्याह अविकार इति । विष्णुर्जन्मादिषड्
भावविकाररहितः । विष्णुर्विवर्ताधिष्ठानत्वेन निर्विकार इति भावः । साक्ष्यविक्रियः सिद्धो निरवद्य इति श्रु
तेः । कीदृशं विशेषणमाह । अजया मायया विहारो यस्य सः । अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृज
मानां सरूपाः । इन्द्रो मायाभिः पुरुरूप ईयत इति श्रुतेः । मायया विश्वाकार इति भावः । सर्वनियन्तृत्वमाह ।
स्थिराणां चराणां च नराणां जीवानामीश्वरो नियन्ता सर्वान्तर्यामित्वेन कर्तुमकर्तुमन्यथाकर्तुं समर्थः । यः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मा·श·
२

सर्वाणि भूतान्यंतरो यमयत्येष त आत्मांतर्याम्यमृत एष सर्वेश्वर इति श्रुतेः। कारुण्यपूरः सरसवक्ता
रपरमपवित्रोज्ञनमाह। प्राणिनां कर्णधारो नाविकः संसारसमुद्रतारक इत्यर्थः। स्वरूपमाह प्रकटितः प्र
काशितः परमात्मानंदचिद्रूपांसांद्रो घनो घनकाठिन्यवदेकरसो देहो येन सः। सच्चिदानंदज्ञानघन इत्यर्थः प
रमपदं। नित्यस्वरूपचिद्घनविग्रह इत्यर्थः। तमेकं गोविंदं सच्चिदानंदविग्रहं पंचपदं वृंदावनसुरभूरुहतला
सीनं समरुद्गणोहं परमया स्तुत्या तोषयामीति श्रुतेः। निर्दोषपूर्णगुणविग्रह आत्मतंत्रो निश्चेतनात्मक
शरीरगुणैर्विहीनः। आनंदमात्रकरपादमुखोदरादिः सर्वत्र च स्वगतभेदविवर्जितात्मेति स्मृतेश्च। ननूत्प
त्त्यपायवत्तास्तयोः कथं नित्यत्वमिति चेन्न श्रीकृष्णेरेवतथाबाधनं तयोर्ब्रह्मस्वरूपत्वेन नित्यत्वात्। नित्यं विज्ञा
नमानंदं ब्रह्मेति श्रुतेः। ननु देहदेहिभेदप्रतीतेः कथं तत्स्वरूपत्वमिति चेन्न राहोः शिरोवदभेदेपि भेदोपचारो

राम·
२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

द्रष्टव्यः। नत्वानंदं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमिति श्रुतेर्गुणत्वावगमात्कथं तत्स्वरूपतेति वाच्यं ज्ञा
नानंदयोर्गुणत्वे प्रमाणाभावात्। केवलो निर्गुणश्चेति श्रुत्या गुणवत्त्वप्रतिषेधाच्चानंदं ब्रह्मणो रूपमित्य
भेदेपि भेदेनौपचारिकी षष्ठी द्रष्टव्या। नन्वानंदस्य पंचत्वादुपपन्निः रूपो रूपेषु यानामस्य पर्यंतु योगासंभवा
त्। आनंदमेतज्जीवस्य यत्प्रयागानंदब्रह्मेति श्रुत्यंतरात्स्व श्रुतमानंद देहोनित्यश्चिद्धन एवाश्व सर्वादा
नंदस्वात्मवन्नंदस्तस्तेनोः। श्रुत्यास्मृत्या चाभ्युपेतस्य सद्भिर्नैवं यस्मिन्नीतिकोमै यथाख्यातानंदस्याव
यवत्वात्स्याद्दृश्यत्वादविभुत्वमनः। जन्यत्वाद्रूपवत्वाच्च नित्यतोः स्मृतशरीरवत्तत्त्वानंदेनोपाधेर्मौलिकत्वस्यस
त्वाद्देहानित्यादेव कीनंदनस्य। किंचथाग्नेर्वाधितत्वान्स्वशद्बेर्नित्यादेहे न कपालभस्मावत्। नवचश्र
पाणिपादोजवनो गृहीता पश्यत्यचक्षुः सशृणोत्यकर्ण इत्यादिश्रुत्या विरुध्यत इति वाच्यं। अपाणि

3

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा.शा.
३

तं

पादस्कन्धाद्याक्षेपापि पादश्च तिपेक्षादविरोधः। भगवदादिर्भावे निदर्शनमाह विष्णुरिवेति विष्णुः
पूर्णैश्वर्यो यथा प्राचीदितिनिमित्तमभूदेतिनद्वदेव कोनिमित्तीकृत्य स्वयमाविर्बभूव। न तु जीववद्धीन संबं
धेन कर्मपरतंत्रस्तामावानस्वतंत्रवस्य तदुक्तं श्रीभागवते देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाश
यः। आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः इति। श्रीविष्णुरेव मत्स्यादिसर्वलीलावतारी स एव श्री
कृष्णः। एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयं। इंद्रारिव्याकुलं लोकं मृडयंति युगे युगे इति स्मृतेः के
ः एष वै भगवान्साक्षाद्धरिर्नारायणः पुमान्। मोहयन्मायया लोकं गूढश्चरति वृष्णिषु इति मोक्षोक्ते रामः
श्च। अत एतस्यैवावतारित्वमाह। स्वैरं यथा स्यात्तथा लीलावतारा [illegible] मत्स्याद्या यस्य सः। स्वैरं लीलयाऽव ३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नारायणस्येति वा तदुक्तं नारदेन सर्वावतारतः कृष्णायविशामस्त्विति वैष्णवेषु ममप्रकल्या-
णगुणात्मको हि स्वशक्तिलेशात् नश्वरसर्गः इत्युतारहीनाभिमतो ऽप देहः संसारित्वनाशो ... स्थितो मा-
यिति। न तु तर्हि किं कारणमिव जीवादिवत् जनित देहेन तावेशावतारस्यावदवतारः प्रमाणमावादुक्तश्च
माणविरोधात्। ग्रन्थकृदत्र स्वयं विभज्य तोपकाले। तस्मादत्र भगवदाविर्भावमंगलमिषेण नित्यस-
च्चिदानंदघनविग्रहः श्रीकृष्णः शास्त्रस्य विषयः संसारपतितजनोद्धरणमेव परमप्रयोजनमिति सिद्धा-
न्तः १ श्रीकृष्णः शरणम्

श्रीमद्वृन्दावनचन्द्रो जयति

श्रीराधारमणो जयति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा॰ म॰
४

मंगलमुपन्यस्य ग्रंथं प्रतिजानीते कारं कारमित्यादिना ग्रंथारंभस्य गुरूपदेशमूलकत्वाद्ग्रंथादौ गुरुप्रणाम
उच्यते । यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इति श्रुतेः । आचा
र्यं मां विजानीयान्नावमन्येत कर्हिचित् न मर्त्यबुध्यासूयेत सर्वदेवमयो गुरुरिति भागवतोक्तेश्च । साक्षा

कारं कारं गुरूणां चरणनलिनयोर्गाढरेणुप्रणामान् स्मारं स्मारं मुनीनां मतममलतरं कर्कशं तार्किकाणां
स्मारं स्मारं प्रयत्नाद्गिरिमगणविदां सम्मतं शाब्दिकानां सिद्धांतानां समस्तानद्भुतकमतिमतेर्गाघवेंद्रस्तनोति १

तानां ब्रह्मादीनां सम्मतान् सर्वशास्त्रावलोकनात् तदुक्तं श्रीभागवते स्वयंभूर्नारदः शंभुः कुमारः कपि
लो मनुः प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयं । द्वादशैते विजानीमो धर्मं भागवतं भटा इति ॥ राघ
वेंद्रो मुनिः कृष्णितं तनोति तनोति करोतीति भावः १

राम॰
४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शास्त्रमारभते यो विश्वाद्य इत्यादिना यो विश्वस्याद्योऽभिन्ननिमित्तोपादानकारणं स श्रीगोविंदो वृंदावनस्थविपिन
मंदेत्यन्वयः। आद्यत्वेपि सुवर्णादिवद्विकारित्वं वारयति अप्रनष्ट इति परिणामित्वविकारदोषरहितः। विश्ववि
वर्त्ताधिष्ठानत्वेनायस्कांतमणिवन्मायाकार्याणां कारणमिति भावः। निष्कलं निष्क्रियं शांतं निरवद्यं निरंजन

यो विश्वाद्योऽनवद्योऽखिलनिगमगणैर्गीयते पाद्यते देव एकः पाश्चाद्यैर्देववृंदैरपि न परमयाविद्ययामास्पृश्यते यः
श्रीगोपालिकाभिस्स्वरतिमधिगताभिस्त्विहानंदहेतुः श्रीगोविंदः स वृंदावनस्थविपिनगसानंदकंदोनमंद २

नमिति श्रुतेः। प्रमाणमाह। आगमगिरा आपाद्यते प्रतिपाद्यते। यतो वा इमानि भूतानि जायंते येन जातानि
जीवंति यत्प्रयंत्यभिसंविशंति तद्ब्रह्म तद्विजिज्ञासस्वेति श्रुतेः। यतः सर्वाणि भूतानि भवंत्यादियुगागमे।
यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये इति स्मृतेश्च। जन्माद्यस्य यत इति न्यायाच्च। तस्यानेकत्वमस्यति। ए

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा·श· ५

कइति। ध्यानमीलनयनदेव एक इति श्रुतेः। दीप्यतीति देवः स्वप्रकाशः। नन्वयं तु स्वप्नः स्वयंज्योति-
रिति श्रुतेः। स एव नः कीदृक्त्वस्मात्पीठेदैवस्य हैरपि परमया विद्यया आत्मविद्यया मामाद्यते योनन्वा-
थते। अथ परायया नदक्षरमधिगम्यत इति श्रुतेः। स एव गोपालिकाभिरन्याभिस्त्वरितं गोष्ठं यथा
स्यात्तथाधिगतः प्राप्त इति संबन्धः। अहो येन्नः प्रमाण इति भावः तद्विरं स्वयं भगवता मत्कामा भमपं
नारमत्स्वरूपविशेषवन्तः। ब्रह्मा परमं प्राप्तः संगात्तन्महत्स्वरूपः। तेनाधीतश्रुतिगणोनोपासितम
हन्नमाः। अत्र ज्ञानान्नतपसोम्-त्संगान्माप्तुपागताइति। ब्रह्मादीनां चाधिकारिणामधिकारसमाप्तौ म
गवत्साम्निर्मविष्ठतीतिभावः तथा च पारमर्षं सूत्रं यावदधिकारमवस्थितिराधिकारिकाणामिति

राम· ५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

6

यद्वा तेषां श्रीस्वरूपाणां प्रेमसंकेतस्थानानामाह्लादविलासः तदुक्तं नायं सुखापो भगवान् देहिनां
गोपिकासुतः। ज्ञानिनां चात्मभूतानां यथाभक्तिमतामिहेति॥ सक्रीडत्कृष्णविग्रहानंदः देहः। विनाश
नेन घनस्थितहेतुः स्थितहेतुस्थानाभावानंदस्वरूपतामृतो देहोऽयमस्य। ग्रंथकृता स्वयमग्रे व्यासतो वक्ष्यते।
वृंदावनमनुवीतिप्राधान्यादभिहितं तदुक्तम् वृंदावनं गोवर्द्धनं यमुनापुलिनानि च। वीक्ष्यासीदु
त्तमा प्रीती रामकेशवयोर्नृपेति॥ अतस्तासामानंदानां कंदमूलं। एतस्यैवानंदस्यान्यानि भूतानि
मात्रामुपजीवंतीति श्रुतेः ३ श्रीमन्नंदनंदनो जयति श्रीवृंदावनचंद्रो जयति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

जगत्कर्तृत्वादिकं विवृतिपङ्क्तौ निराकरिष्यन्नादौ कापिलानां विवृतिपङ्क्तिमुपन्यस्यति स्यादेतदित्यादिना। न
नु जगदेतत्सुखदुःखमोहात्मकमनुभूयते अतस्तादृशेनोपादानेन भवितव्यमुक्तं न तु चेतनेनोपादानेन चेतनतथा
ऽचेतनस्य सर्वं जगत्तेन तन्मते वक्ष्यमाणत्वान्न तु नह्यविपरीतं तत्स्वरूपं चानोपादानतामनुमीयते इत्याशंक्याह स्यादेतदिति। सत्त्वं यश

स्यादेतत्सम्यक्प्रपंचस्त्रिगुणगुणकृतो दुःखमोहात्मकत्वान्मृत्स्नाकुंभादिवत्स्यान्न च भवरचनानोपपन्नाऽजडत्वात्
सर्गः प्रांतं च तस्यात्मकृतिपुरुषयोर्योगतः शक्तिदृष्टेर्यद्वाङ्गीरवद्दृन्दैरिव निगमवचो वक्तृतेत्यादिमानं ४

स्यादित्यादि। प्रपंचस्त्रिगुणगुणकृतस्त्रिगुणं प्रधानं तस्य गुणाः सत्त्वरजस्तमांसि तैः कृतस्तदुपादानकः सुखदुःखमोहात्म
कत्वान्मृत्कुंभादिवत्। अस्मदनिर्दोषकार्यस्याप्यत्यर्थसंभितिः। हृद्यं सुखदुःखमोहस्तमसः एकैकशः स्वपलभ्यमानानामेक
स्मिंस्त्वेकस्यापि दुःखैकस्यापि च मोहोऽनुभूयते। अतो विश्वं त्रिगुणोपादानकं युक्तमीक्षामहे। ननु त्रिगुणस्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0.-Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

[illegible]
[illegible]
[illegible]

[illegible]
[illegible]

[illegible]
[illegible]
[illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कार्यं तर्हि सर्गाद्ये चेतनोपलभ्यमानत्वाद्दृष्टघटज्ञानवत्। यस्य सर्वं मुक्तं तस्य पंगुव्यापाराद्चेतनमपि प्रधानं
चेतनपुरुषसंयोगाद्धि स्वसर्गे प्रवर्तत इति तत्र वाच्यं क्षमाहा। स्त्रीपुंसोरिति। प्रकृतिपुरुषयोर्नित्ययोर्नि
त्यसंयोगात् प्रलयो न स्यान्नित्यसर्गप्रसंगः स्यान्नियामकाभावाज्ज्ञानादृष्टं नियामकमिति चेन्न पुंसामसं
गत्वेनादृष्टेन सह संबंधाभावात्। अथ योगायुक्तपुरुषप्रवृत्तिकृतेः। यत्कर्मज्ञानस्य सत्त्वधर्मत्वादिति तन्न। प्र
कृतेः साम्यावस्थायां यदि सत्त्वनिमित्तं सार्वज्ञ्यं कल्प्यते न हि रजस्तमोनिमित्तं असत्त्वमकिंचिज्ज्ञत्वमपि कल्प्येत
समानन्यायात्। गुणानां परस्परोपमर्दस्वभावत्वात्। अथोद्रेकेण साम्यावस्थायां हि तात् स्यात्। स्वकार्या
पेक्षया च सर्वशक्तिता कल्प्यते सर्वशब्दः संकोचवृत्तिः स्यात्। गतौ सत्यां तादृशकल्पनायोगात्। यः सर्वज्ञः
परास्य शक्तिर्विविधैव श्रूयत इति श्रुतेः परमेश्वरं तादृशं प्राचयति यच्छक्तं सत्तावतापीत्याशंक्य तन्न यथाति:

क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वाणि च भूतानि सर्व एवात्मानो व्यु
च्चरंतीत्यादिश्रुत्येशस्य विश्वोपादानता स्वीकर्तव्या लाघवव्यवस्थितत्वादीशाधिष्ठिताया स्वप्रकृतेर्जग
दुपादानतास्वपरामास्त्वा मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति श्रुतेः। जीवानां च कर्मवैचित्र्याद्वि
श्ववैचित्र्यसंभवान्न काप्यनुपपत्तिः। यत्तूक्तं वत्सविवृद्ध्यर्थं क्षीरप्रवृत्तिवदिति तन्न धेनोश्चेतनत्वात्तदंतर्या
मिणोंशेन प्रेरितत्वात्क्षीरप्रवृत्तेः संभवाद्दृष्टांतः। सर्वज्ञेश्वरकर्तृत्वे प्रमाणमाह। स ईक्षांचक्रे स लोकान
सृजतेति स परमात्मा ईक्षांचकार प्रलये मयि विलीनाः संति तानहं सृजानि पृथगित्यालोचनां कृतवान्
तदनंतरं स लोकान्सृष्टवानिति श्रुतेरर्थः। न चाचेतनस्य प्रधानस्य तादृगालोचनं संभवति। तदैक्षत बहु
स्यां प्रजायेय। ईक्षतेर्नाशब्दमिति न्यायेपि प्रधानमशब्देन निराकरोतीति भावः ५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यत्तूक्तं निगमवचोवस्पतेत्यादिमानमिति तत्राह तेजोऽबन्नात्मिकामित्यादिना अजामेकामित्याद्याश्रुतिरी
श्वराधिष्ठितां तेजोऽबन्नात्मिकामजां तां छांदोग्याभिहितां लोहितादिप्रत्यभिज्ञानमयति तेजोऽबन्नयत्तितरामजा

तेजोऽबन्नात्मिकां यां प्रकृतिमभिहितामीश्वराधिष्ठितां तां रूपादिप्रत्यभिज्ञान
मयतीति नरामत्रवाक्यविशेषात् साङ्ख्याभिमतात्यां सकलजगदुपादानमी
शानपेक्षस्वातन्त्र्यात्मीवत्किमायां प्रकृतिमिति गिरा वेदवाक्यैः शपथैः ६

मित्यत्र वाक्ये क्रतः विशेषादुपक्रमोपसंहारविशेषहेतोरित्यर्थः। न तु तेजोऽबन्नात्मिकायाः प्रकृतेर्ब्रह्मज
त्वं कथमनाशङ्क्याथत्रमिति चेत्सत्यमित्याह साङ्ख्यादिनिश्चयभावः स्वनाशङ्कः साध्ये कल्पितप्रकृतौ नयोग्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा·शा·
१

र्थस्तस्याः पारिभाषिकत्वात् । नवा स्वतन्त्रं ब्रह्मकारणवादानां नवा पंकजवद्योगरूढस्तत्र मिश्रमाणानामनवस्थां
दोषयपरिपठितायां तेजोवन्नात्मिकायां तन्नेजोऽसृजतेत्यादिश्रुत्या ब्रह्मजन्यत्वाभिधानात् । तस्मादव्यथा
नुपपत्याः सा साहस्याल्लक्षणया तेजोवन्नां लक्षणां प्रकृतिमजामीशाधिष्ठितां सकलजगदुपादानं मायां
वप्रकृतिं विद्यान्मायिनं तु महेश्वरमिति वाक्यशेषा वक्ति न स्मार्तीं सांख्यपरिकल्पितामचेतनां स्वतंत्रामि
त्यर्थः । वसष्ठवांदि विशेषादि निन्यायोपितामसामसिद्धयाति । नतु लोहितादिशब्दात्स्मार्ती त्रिगुणाम
जामभिधास्यतीति चेन्न स्मार्तत्वाभिज्ञायाः श्रौत्या बलीयस्त्वात् श्रुतिस्मृतिविरोधे च श्रुतिरेव बलीयसी
ति न्यायात् । न च द्वैतं चेन्न हि स्मृतेः सर्वथाऽप्रामाण्यप्रसक्तिरिति चेत् किं न श्छिन्नमपौरुषेयागमस्य स्वतःप्रा
माण्यान्न द्विरोधे स्मृतेरप्रामाण्यमिष्टमेव । अविरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति न्यायात्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उतः सांख्यवादी विश्वोपादानं प्रधानमनुमिनोति नह्येति एकप्रकृतिकमेकोपादानकमिति
साध्यम्। परिमितस्वल्पकार्यत्वात् इति हेतुः तत्रार्थः परिमितत्वादपरिमितत्वाद्यद्यत्परिमितं कार्यं तत्तदे

नन्वेतद्विश्वमेकप्रकृतिकमपरिमितस्वल्पकार्यत्वतः स्यान्मृत्स्नाकुंभादिवस्तोऽत्र
बहुलशरीरेष्वनेकांनतेषाम् किंवाघ्रकेण मित्रप्रकृतिकमखिलं दृश्यते का
र्यमेतन्मृत्स्नं तत्स्वर्णमेवाहटपटकटकं सर्वलोकप्रतीतम् ७

कप्रकृतिकं दृष्टं यथा मृदुपादानकं कुंभादि एवं स्वल्पत्वात् परिमितत्वाद्यद्यत्परिमितं कार्यं तत्तदे
कप्रकृतिकं दृष्टं यथा सुवर्णकुंडलादि तथा कार्यत्वतः कार्यत्वान्न यद्यत्कार्यं तत्तदेकप्रकृतिकं दृ

10

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ष्टं। यथा मृद्घटकनककटकादि। सार्वविभक्तिकस्तसिरिति वक्तव्येन तसिः प्रत्ययः। हेतुमति। तो इति। तु
रूपस्य गुणशरीरेष्वेषामसिद्धादिहेतुत्रयाणामनेकान्ततामपि वारयति। तु कणाणामात्मनामपरिमि
तानामकार्यत्वादेकप्रकृतिकत्वमिति भावः। तथा गुणानां सत्त्वरजस्तमसां परिमितानां अकार्यत्वादे
कप्रकृतिकत्वमिति भावः। तथा शरीराणां पंचमहाभूतकार्याणामेकप्रकृतिकत्वमिति भावः। साध्यवै
कल्यं शंकते। किं चेति। अध्यक्षेण प्रमाणेन अविलम्बेन कार्यं भिन्नप्रकृतिकं दृश्यते। मृत्तन्तुसुवर्णानां
कारणानां भेदात् घटपटमुकुटमनेकं विभिन्नं कार्यम्। सर्वजनप्रतीतमित्यर्थः। अतः साध्यहेत्वोर्दृष्टा
न्तसाध्यानुमानमप्रमाणमिति भावः ७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एकत्वेन ज्ञात्वा [illegible] मतमस्य मानमित्याशंक्याह । एवं पातंजलानामप्रीतिप्रधानमचेतनं स्वतंत्रं जगदुपादान
मिति मतं प्रेक्षावद्भिरुपेक्ष्यमित्यत्र युक्तिः हेतुमाह वैदिकानामौपनिषदानां व्यासादीनां मतमिति मतं [illegible]
[illegible] मतमिति [illegible] मतं [illegible] मतमिति [illegible] हेतुमाह ईश्वरात् चेतनात् सर्व

एवं पातंजलानां मतमपि [illegible] वैदिकानामपेक्ष्यं प्रेक्षावद्भिः [illegible] कपिलमतमित्याशंक्य [illegible]
[illegible] उपादानमीश्वरं सर्वज्ञं सर्वशक्तिं विद्धि स्मरन् गिरिजे विश्वकर्तारमीशं ॥ ८

[illegible] सर्वशक्तिप्रधानमीश्वरात् [illegible] जगदुपादानं [illegible] सर्वज्ञं सर्वशक्तिमीश्वरं विश्वकर्तारं ज
गत् [illegible] भिन्नाभिन्नोपादानमात्मं [illegible]
विश्रान्तीत्याद्याः स्मरन् गिरिजे वेदान्तवाक्यैर्विद्धि [illegible] इत्यर्थः ॥ ८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा॰श॰ वैशेषिकतार्किकयोः समानतन्त्रत्वात् परमाणूनां द्व्यणुकाद्यारंभक्रमेण विश्वोपादानताम् अभि-
२२ प्रेत्य संयोगाभाववतोः एवाशिति श्लोकोऽयं अंशयोरनवयवयोः संयोगाभावात् द्व्यणुकस्य अजागत्ता

संयोगाभाववतोऽप्य द्व्यणुकस्य वस्तुतः कथमुपपत्तिः अंशयोर्नाशांशैः कल्पितैर्वा
निरवयवमतत्वात् इति तार्किकाणां कथं स्वांशैः कार्यमदिति तत्त्वविनाऽवा-
स्तवत्वाद् अमीषां तस्मान्नैयायिकानाम् अणुमतत्वं चतारंभवादोऽप्रमाणः ७

यतोऽनवयवयोः संयोगासङ्गाव इति चेत् आह। नाशांशैरिति। परमाणूनां नित्यत्वात् अदादानामपि त-
थात्वात् तेषां सावयवत्वात् निरवयवमतत्वात् इति स्यात्। सावयववत्वे च घटवत्तेषाम् अनित्यत्वात् अनित्यत्वमनवस्था

रा॰प॰ २२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हतिरपि निरंतरा किं कारणमित्यर्थः। अथ कल्पितैरवयवैर्वा संयोगः स्यात्तत्राह। कल्पितैरंशैरवयवैः उ
नः कार्यं स्यादित्युक्तादिस्थिति सत्यं नन्वविनाशवेदमीषां कल्पितानामवयवानामनवस्थानात्। किं चा
णोः संयोगः सर्वात्मनैकदेशेन वा यदि सर्वात्मना तर्हि अधिमात्रप्रपत्तिर्द्वयोरनवयवत्वात्। यद्ये
कदेशेन तदानयोर्देशाभावान्न संयोगोपपत्तिः। परमाणुकारणवादे च कृतिस्मृत्यनुमित्यादीनां
प्रमाणानामप्रामाण्यादैनशिष्टापरिग्रहात् अपि चात्यन्तानादरणीयाच्च अणमततवत्ताद्वारम्बदोनिष्प्र
माणत्वार्थः ९ श्रीकृष्णचंद्रो जयति श्रीवृंदावनचंद्राय नमः श्रीकृष्णः शरणं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

किंच कर्मवतां तेषां संयोगदर्शनादएकसंयोगक्रमाद्यं कर्म किंचिदस्त्वपेयमचेतनतयातदपि परमात्म
योजयितुं न समर्थमित्याह आद्यं कर्मापीति नद्याद्यं कर्म किमात्मप्रयत्नोऽभिघातादिकं वेति विकल्पो

आद्यं कर्मापि चात्मप्रयत्नजं तद्योजितुं नैव शक्यं देहाभावाद्वपुष्मान् कृतिरपि न
मवेन्नाभिघातादिकं वा नित्यत्वादीशितुर्नो कृतिरपि च विनानित्यसर्गप्रसंगात्
दृष्टद्वारिकामात्रमवतिष्ठ पराधीनता स्यात्तदास्याः ॥१०॥

न यथापि न संभवतीति हृदयति देहाभावाच्चेति देहप्रतिष्ठे मनस्यात्मगुणः प्रयत्नो जायते दृष्टेः आकृतुं समा
त्मनां देहाभावात्कृतिरपि न सम्भवेन्नाभिघातादिकं वा सम्भवेदिति क्रियान्वयः। उभयथापि न कर्मात्मसदसा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चइतिन्यायाच्चनाद्यंकर्म्माणुसंयोगजनकंतदभावाच्चद्व्यणुकादिक्रमेणविश्वसृष्टेरभावइतिभावः।
किंचईश्वरप्रयत्नस्यनित्यत्वान्नित्याणुसंयोगेनित्यसर्गःस्यात्प्रलयाभावश्चसंगरइत्याशंक्याह।नि
त्यत्वादीशितुरिति।ईशस्यकृतेरपिनित्यत्वात्परमाण्वोःसंयोजकत्वेविनानित्यसर्गप्रसंगात्
सर्गस्यकादाचित्कत्वात्प्रलयाभावप्रसंगदोषाच्च।नचात्मनामदृष्टद्वारिकासाक्षात्कृतिःप्रवर्त्तत
इतिवाच्यं।तदानस्याःकृतेःपराधीनतात्मादृष्टाधीनतास्यात्तत्रचसापेक्षत्वेननित्यत्वव्याहतिःस्या
दितिभावः।ईश्वरप्रयत्नस्याणुसंयोजकत्वेत्वपसिद्धांतापाताच्च १० श्रीकृष्णःशरणं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा.श. १२

ननुजीवात्माचेतनत्वात्स्वोपार्जितकर्मफलभोगायगृहक्षेत्रादिवत्तत्तल्लोकगतः स्वतंत्रीश्वरस्यचजगत्सर्जने पूर्णकामत्वेनप्रयोजनाभावादित्याशंक्याह नाजीवइति स्वल्पविज्ञत्वादल्पज्ञत्वादल्पशक्तित्वाच्च।

नाजीवः स्वल्पविज्ञत्वादुदधिगिरिसरित्स्वर्गसर्गाद्यशक्तः स्रष्टुं कर्मापि चैवं भवति
च जगतो नैवमेतज्जडत्वात् नापि योगी समर्थः कथमपि च पराधीनवृत्तेर्विज्ञानव
त्त्वादिकृत्व्यापारवर्जं वदति मुनिमणिर्नागमोऽथ प्रमाणम् ॥ ११

समुद्रगिरिनदीस्वर्गादीनां सर्गे शक्तः समर्थः न हि सर्वज्ञं सर्वशक्तिमीश्वरमृते मनसाप्यचिंत्यं विश्वं स्रष्टुं जीवः कश्चिदपीष्टे। ननु विश्वस्रष्टरीश्वरे स्वीकृतेपि विश्ववैचित्र्यार्थमवश्यं जीवकर्माण्युपेयं तावदेवास्मादि

रा.म. १२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सुसृष्टं किमीश्वरेणेत्याशंक्याह। स्रष्टुं कर्म्मापीति। नैवं कर्म्मापि नाशयान्नैवमेतद्विचित्रं जगत्स्रष्टुं प्रभ
वति। ननु योगी सर्वज्ञः सर्वशक्तिमान् विचित्रविश्वस्रष्टास्यादित्याशंक्याह। नो वा योगीति। सर्वयोगी
ज्ञानी विचित्रं विश्वं स्रष्टुं कथमपि च केनापि प्रकारेण न च समर्थः। कुतः पराधीनविज्ञानत्वात् दृष्टांग
योगाभ्यासवशीकृतचित्ततयोपासनाजगत्प्रसादसमासादितज्ञानशक्तेर्निरुपचरितज्ञानश
क्त्यभावाद्विचित्रविश्वरचनासामर्थ्यात्। अत एव कृष्णद्वैपायनो मुनिमणिर्जगद्व्यापारवर्जं प्रकर
णात् असन्निहितत्वाच्चेति सूत्रं वदतीत्यर्थः। किं च योगिनो जगत्सर्गे नागमो मानं दृश्यत इति शेषः ११

14

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा·श·
२६

केचित्तन्मीमांसकास्तुनान्नित्यं मन्यन्ते तन्मतं दूषयति। सांशब्दान्नित्यत्वमित्याऽनित्यं जगदिति साधयति। वि
श्वमनित्यं सावयवत्वाज्जन्यवत्वाच्च कुंभवदित्यनुमानं विश्वानित्यत्वे मानमित्यर्थः। न केवलमनुमानं विश्वस्य
ध्यादि निगमवाक्यमपि मानमिति शेषः। नन्वाम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यत इ

मांशब्दानामपि नित्यं सवति जगदिदं कुंभवज्जन्यवत्वान्मानं स्वश्यादिवाक्यं नच विधिपरता वेदवृन्दे घटेत
कर्मत्वस्यैकांडप्रकरणविनिदानैकवाक्यत्वभावो विज्ञाने विध्यभावान्न हि खलु मदिताज्ञानविध्यंगतैषां १२

नित्यायात्मोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं तस्य यदश्रुशीर्यत तद्रजतमभवत्तस्माद्बर्हिषि रजतं न देयं वाक्यवैक्लेपि
ष्टादेवतेत्यादिवाक्यानामुपतिपादकानामानर्थक्यादप्रामाण्ये प्राप्ते। विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्यु
रिति सिद्धान्तसूत्रेऽक्रियार्थानां विधिशेषत्वेन प्रामाण्यमुररीकृतं तस्मात्साम्पाडुपनिषदामप्यक्रियार्थानां विधिशेषत्वे

राम·
२४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

न प्रामाण्यं स्युरिति मन्यामहे तथा वक्तुं नो विश्वसर्गादौ तासां स्मार्त्तत्वेन प्रामाण्यमिति चेन्न तत्र सर्वाः स्वस्व
उपनिषदां कर्मविधेः शेषत्वं तु न ज्ञानविधेः यदि कर्मविधेस्तर्हि श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्या
नां दारपारदौर्बल्यमर्थविप्रकर्षादिति न्यायात्तथा प्रमाणानामेकतरस्यापि विनियोजकस्याभावेन कर्म
ब्रह्मकांडप्रकरणभेदान्नैवांवेदशिरस्सा कर्मविधिशेषता घटेतेत्याशंक्याह । न च विधिपरत्वेति । नन्वर्थमव
त्यैकवाक्यत्वे वाक्यभेदो हि नेष्यत इति न्यायात्सर्वेषां वेदानामेकवाक्यत्वात्तेषामपि कर्तृदेवतास्तावकत्वेन कर्म
विधिशेषतावर्णनीयेति चेदित्याशंक्याह । नैकवाक्यत्वसंभव इति । अयं भावः न हि सर्वेषां वेदानामेकवाक्यतासं
भवति धर्मोपासनाधर्मादिनैकार्थप्रतिपादनात् ततः सर्वज्ञैर्मोक्षकाङ्क्षिरुक्तं फलजिज्ञास्यभेदाद्वेति । न चात्मा वा अरे
द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादिश्रुतेर्ज्ञानविधिशेषत्वमेषामिति चेन्न हितीय इत्याह विज्ञानेति
ध्यमावान्न हि वस्तुमविताज्ञानविध्यंगतैषामिति १३

15

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ननु विज्ञाने विषयभावः कुत इत्यत आह । विज्ञानं मानतन्त्रमिति ज्ञानं प्रमाणप्रमेयाधीनं क्वापि विधिपरा-
धीनं नेक्षितं प्रमाणप्रमेयसन्निकर्षे सति ज्ञानं कर्त्रादिस्वेच्छे ज्ञानमुत्पद्यते न कर्त्रादिस्वेच्छयापि तदुत्पद्यतेऽत्र

विज्ञानं मानतन्त्रं क्व च नु विधिपराधीनमीक्षितं नो वस्तुतन्त्रं प्रतिगृह्य भ्रमरणवि-
विदः स्निग्धतोऽपि प्रमत्तैः नो शास्त्रे भावनायां न विधिविरहे घटेतापरोक्षेऽन्तं नवा-
मः शास्त्रव्याख्यानुवादैः समधिगतनयानथ्यमहार्थेऽपि ॥ १३

तेन विधितन्त्रत्वाभावान्नवत्पुरुषाधीनमित्याह । न वस्तुतन्त्रमिति । इति गृह्य भ्रमरणविविदः संभोऽस्निग्धतोऽपि न
तिरोभावप्राणप्रसंगात् । किं वा ज्ञाने विधिं वदन्त्वादीत्र दृश्यः किं शास्त्रे भावनायां साक्षात्कारे वा नाद्यः समधीत

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

16

व्याकरणस्याविदितपदपदार्थतत्त्वस्यैवं सः । शाब्दश्रवणमात्रादेव ज्ञानोत्पत्तेर्न विधेरपेक्षा न च भावनायां
ज्ञानोत्कर्षभावस्यान्वयव्यतिरेकसिद्धत्वात् । न चापरोक्षत्वस्य फलत्वादित्याह । नो शाब्द इति । शाब्दस्याध्ययनस्य
कांक्षायोग्यतासन्निरूपकत्वस्याधीनव्याकरणस्य विधिं विनापि प्रवृत्त्यादेशादिशब्देन व्यतिरेकफलयोर्ग्रहणा
त्तेन भावनायामन्वयव्यतिरेकसिद्धत्वेन च फलस्य चाविधेयत्वेन समधिगतत्वाज्ज्ञानतया विधिर्न घटेतेति भं
वः । तदुक्तं । विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयत इति । तत्त्वत
हिंस्नात्वा वाग्रे दृष्टस्य इति विध्यर्थेन त्वस्य त्वन्योऽर्थः स्यादिति चेन्न अर्थ इत्याह । तस्य मर्हार्थके पीति पाणिनि
सूत्रनिर्दिष्टकालविशेषः । उक्तं चार्हार्थे च कृत्यस्मरणमभिमतं पाणिनेः प्रार्थनादौ लिङ्लोडादेशसूत्रैः प्र
सूत्रमभिमता पाणिनेर्जैमिनेश्चेत्यादि । तेनात्मा द्रष्टव्यो दर्शनार्हो दर्शनयोग्यो नान्य इत्यर्थः ॥ १३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा·श·
१६

न्वयग्राह्यानुपपत्त्यांश्वध्वनेव्याप्तावावापोद्वापाभ्यां शब्दसंगतिग्रहः कार्यएव शब्दसंगतिग्रहे न सिद्धे तयोरन्वा
यादनेवेदांतानामपि कार्यपरत्वाविशेषात्क्रत्वर्थकर्तृदेवतादिप्रकाशकत्वेनेति तन्मतमपाकर्तुमाह। कार्येसि
द्धेपीति। बालकानां पदपदार्थविदामावापोद्वापाभावेपि सिद्धे शाब्दी संगतिः शब्दसंगतिग्रहो भवतीतिच
सिद्धे कार्येपि शाब्दी भवति पदवृद्धानां संगतिर्बालकानां जातः पुत्रस्तवेति श्रवणप्रभवात् हर्षहास्यं पितुः स्यात्न
कार्येकार्यान्वितत्वव्युत्पत्तिरणवलात्बाधवादकृत्वेनेशाब्दीशक्तिर्विशेषसर्वोपि खलनिगमशिरोवाक्यतः स्यात्प्रमाणं १४
कश्चिच्छेषः नागरिकस्य प्रस्थितस्य पितुः पुत्रजन्मवार्त्ताहारस्य पुत्रस्तेजात इति वचःश्रवणानंतरं तस्य हर्षहास्यमाल
स्यपार्श्ववर्तीवृद्धेनवत्कार्यार्थसिद्धेः कार्यपरत्वाभावे बालको जानाति पुत्रजन्मनिमित्तमेवास्य पितुर्हर्षहास्यसंप्रा
प्तिरिति सिद्धेपि संगतिग्रहोपपत्तेर्वेदांतानां सिद्धवस्तुबोधकत्वेनतत्कार्यार्थसिद्धेः कार्यपरत्वाभावेन क्रत्वर्थकर्तृदे

रामः
१६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वक्तास्तावकत्वानुपपत्तेः। नह्युक्तं कार्यं बोधे यथा वेद्यालिंगं हर्षादयस्तथा सिद्धे बोधेऽर्थे वक्तैवं शास्त्रत्वं हि तच्छा
सनादिति। किंच कार्यान्विते शब्दशक्तिरिति पुरुषार्थं हृषयति। कार्येऽकार्यान्वितत्वस्यासिद्धरणत्वादिति। का
र्यान्विते शब्दशक्तिं ब्रुवता कार्यं स्वार्थो नियोगो बोध्यता। यद्यपि तर्हि दर्शपूर्णमासाभ्यां यजेतेत्यत्र केषा
मर्थस्य यागस्य करणत्वेनान्वयान्न कार्यान्वितत्वं सम्भवः। कार्यान्वितत्वं मंगत्वेन प्राधान्येन वा यद्यंगत्वेन तर्हि
नियोगस्य प्राधान्यादंगत्वानुपपत्तेः। कृतिसाध्यं प्रधानं यत्तत्कार्यमभिधीयत इत्युक्तेः। न द्वितीयः। नियोगस्य का
र्यत्वानुपगमात्। कार्ये नियोगे लौकिके शब्दसंगतिग्रहाभावेन कार्ये कार्यान्वितत्वाभावेऽपि चारकत्वाद्योग्ये
तरान्वितेऽपि गौरवाल्लाघवादन्विते शब्दशक्तिरतः कार्यान्वितत्वाभावात् अखिलनिगमशिरोवाक्यविश्वसर्गादाव
पौरुषेयवाङ्मयविप्रलिप्साकरणापाटवादिदोषरहितत्वेन स्वतः प्रमाणं स्यादिति वाक्यार्थः। तथा च पारमर्षसूत्रं
औत्पत्तिकस्तु शब्दस्यार्थेन संबंधस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वादिति २४

17

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा.भा. १२

स्वभाववादं निरस्यति। कार्यमिति। निर्हेतुकं कार्यं स्यादिति वदतस्तव प्रत्यक्षप्रमाणबाधप्रसंगः स्यात् लोके हि कुंभादिकार्यं मृदुपादानकं भवति। न त्वाकस्मिकं कारणमंतरेण कार्यानुत्पत्तेः। किंच कारणनियमाभावे चाति प्रसंगो दुर्वारः स्यादित्याह। सर्वस्मादिति। शिकतायामपि तैलोत्पत्तिर्बलीवर्दादपि च क्षीरोत्पत्तिः प्रसज्येत।

कार्यं निर्हेतुकं स्यादिति विनिगदतोऽध्यक्षबाधप्रसंगो लोके कुंभादिकार्यं भवति
मृदुपादानमाकस्मिकं नो सर्वस्मात् सर्वकार्यं भवति न च मतेनेदृशेन यस्मा
त्तस्मान्नैष स्वभावः सृजति जगदिदं नापि कालो जडत्वात् ॥१५॥

स्वभावस्य च जडत्वात् कालस्यापि जडत्वान्न विश्वसर्गे सामर्थ्यमिति भावः। स्वभावमेके कवयो वदंति कालं तथान्ये परिमुह्यमानाः इति श्रुत्यैव तयोर्निराकरणादिति ॥१५॥ श्रीकृष्णचंद्रो जयति नितराम्

रा.म. १२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

क्षणसंतानवादं निरस्यति विज्ञानमिति। परमाणूनां पुंजं संयोजयितुं क्षणिकत्वेन नैव शक्यं। संहतं तु तस्माद्वा
हि तिष्ठ्याद्विज्ञानादन्यः स्थिरतरः कोपि संहन्तामेलयिता क्षणिकविज्ञानवादेनास्तीत्यर्थः। नाथालय

विज्ञानं नाणुपुंजं क्षणिकमनरमनयायोजितुं नैव शक्तं संहन्ता कोपि चान्यः स्थिरतर
इहतेनास्ति विज्ञानवादे संतानः स्यात्तयोपि क्षणिक इह ततो नैव शक्तः समीशोणुपुंजं
तस्माद्विज्ञानवादो न हि भवति सतां सम्मतो निष्प्रमाणः १६

संतानः क्षणिकोणुपुंजं योजितुमीशः समर्थः परमाणूनां विज्ञानात्मनां च क्षणिकत्वेन द्विक्षणास्थायित्वाभावा
दणुपुंजाद्विश्वंआयनइति विज्ञानवादोऽप्रमाण इत्यर्थः १६

18

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा॰श॰ १९

शून्यवादमपक्षिपति। सूक्ष्मोपादानतायामिति। सर्वकार्यसमवायोपादानकं स्वभावविशेषो यस्यैव सत्यस्य उपलभ्य
पूर्वावस्थायां यथा परकल्पितस्यात्मत्वस्य (न) मानात् सूक्ष्मोपादानं विश्वमिति वदन्ति। स्वरूपलभ्यमानपूर्वाव

सूक्ष्मोपादानतायां न निखिलजगतो भावरूपोपलब्धिः प्रत्यक्षेणोपलब्धाऽभवति
मृदि यं प्रागवस्था घटस्य सूक्ष्मं विश्वं स्वरूपान्नादपि लयसमये कारणावस्थमासी
त्सर्गेऽव्यक्तीभवत्यंकुरइव विदितः शून्यपक्षोऽनपक्ष्यः ॥ १७

स्यज्ञादित्यन्ते आत्मनि व्यभिचारवारणाय योग्यत्वे सतीति विशेषणं। दूषयति सूक्ष्मोपादानतायां न विश्वस्य
भावरूपोपलब्धिर्भवति। नाभावउपलब्धेरिति न्यायात् घटादेः कार्यस्य सदन्वयायोगात्। सत्यस्य पूर्वावस्था

सा॰म॰ १८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सृष्टिःयं सर्वं पक्षदृष्टेति हेतोरसिद्धिरनुमानं तु ष्टं नतु सदेवासदग्रासीन्नतो वै सदजायतेति श्रुतिर्विरुध्यस्य
न्यो पादानतां वक्ष्यतीति चेन्नेत्याह। सत्त्वमिति। सत्त्वमसौ प्रलयकाले वासत्तत्सूक्ष्मं कारणावस्थमासीत्तस
र्गे वाभिव्यक्तीभवतीत्यर्थः। नर्हीव्याकृतमासीन्नामरूपाभ्यां व्याक्रियत इति श्रुतेः। ननु तुच्छार्थवाच
कानावाक्यलक्षणान्न्यायेति चेन्न कथमसतः सज्जायेतेति प्रतिषेधश्रुतेरसतः सदुपादानतानुप
पत्तेर्लक्षणैवन्याय्येति तिस्मादत्र माणं ग्राह्यं न्यपक्षः प्रेक्षावतामनपेक्ष्यत्वादप्रयत्यर्थः २७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा.श.
१९

इदानीमीश्वरस्यैव विश्वसर्गसामर्थ्यं नान्येषामित्याशंक्याह। नोभूतानीति। भूतादिब्रह्मादिपर्यंतानां अस्य विश्वस्य सर्गे नो
समर्थान्यविनाशीत्यन्वयः। भूतानि क्षोण्यादीनि पंच ग्रहाश्च ग्रहाः सूर्यादयः। दिगधिपतयः इन्द्रादयः। असर्वज्ञत्वान्नयह
ब्रादय इत्यत्रादिशब्देन नित्यत्वाद्योगगृहीताः जडत्वाच्चेतनत्वाच्च न ब्रह्मादीनामन्वयः। विश्वकर्तृ विश्वमिति पद्मिनि ॥

नो भूतानि ग्रहा वाथ दिगधिपतयस्ते यद्ब्रह्मादयो वा सर्वज्ञत्वानुद्भवादपि वि
लुप्तविनाशेऽस्य सर्गे समर्थाः तस्मान्मायासहायः स्वगुणगणसहितो जीवकर्मानु
रूपं सर्वज्ञः सर्वशक्तिः सृजति हरति पातीश्वरः सर्वविश्वं १८

कृत्वा च संहरति। तस्मादिति। ईश्वरः स्वयमभिन्नविभिन्नोपादानः सर्वं चराचरं विश्वं सृजति हरति पातीत्यन्वयः। तत्र हे
तुः सर्वज्ञः सर्वशक्तिश्चेति। एवं सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्यामी एष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानां सोऽकामय
त बहु स्यां प्रजायेयेत्यादिश्रुतेः। सर्वाश्चेदं विश्वमसौ स्वलीलः सृजत्यवत्यनित्ततत्र सज्जनहत्यादिस्मृतेश्चात्र कृतिश्च

राम.
१९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रतिज्ञादृष्टान्तानुपरोधादिति न्यायाच्च। न चेशोपादानत्वे तस्य चेतनत्वात्तत्कार्यं विश्वं चेतनमेव स्यात्तथा च चेत-
नाचेतनप्रपंचविभागश्रुतिविरोध इति चेन्नेत्याह। मायासहाय इति। तदुक्तं ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत
चात्मनि। तद्विद्यादात्मनो मायां यथाभासो यथा तम इति। विश्वोपादानभूता मायाशक्तिः सहायः सहकारी य-
स्य सः। अतो न चेतनाचेतनप्रपंचविभागविरोधः। अस्मान्मायी सृजते विश्वमेतदिति श्रुतेः। विज्ञानं चाविज्ञानं
चेति श्रुतेः। न विलक्षणत्वादस्य तथात्वं च शब्दादिति न्यायाच्च। ननु तर्हि परमेश्वरस्य वैषम्यादिदोषप्रसक्तिः स्यादि-
ति चेन्नेत्याह जीवकर्मानुरूपमिति। जीवानां धर्माधर्मानुरूपं यथा भवति तथेत्यर्थः। जीवानां कर्मनिमित्तं वैषम्यादि
न चेश्वरकृतं वैषम्यनैर्घृण्ये न सापेक्षत्वादिति न्यायात्। ननु लाघवाज्जीवकर्मैव विश्वकर्तृकं किमीश्वरेणेति चेन्न क-
र्मणोऽचेतनत्वात्स्वतन्त्रकर्मीशमन्तरेण प्रवृत्त्यनुपपत्तेः। फलमत उपपत्तेरिति न्यायात्। विश्वस्य मायाविरचितत्वे दृष्टान्तमा-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ननु विश्वं सर्वं क्षितिमारभ्य नानुमव्याकथं मृषेत्याशंक्याह। स्यादेतत् क्षितिविश्वं सत्यं प्रत्यक्षप्रमाणप्रमितत्वा
द्घटवदित्यनुमानादित्याह स्यादेतन्न सदवमितं नो मृषा प्रत्यक्षप्रमाणक्षितिहृदयतिनेति श्चप्रत्यक्षं तन्नान्मृषात्व

स्यादेतदद्वि सत्यमेतन्न सदनु सदवमितं नो मृषा प्रत्यक्षप्रमाणानाध्यक्षत्यमनाङ्गवति
खलु मृषा स्थूलगौरनुमावन्न पौर्वापर्यैण्णनाथ्यं निगमनागिराऽपेक्षप्रत्यक्ष
माणं प्रत्यक्षौ ह्यनुमावन्नवनिगमागिरः पौरुषेयवद्धेतोः ॥ १९

नित्यस्थूलोऽहं गौरोऽहमिति प्रत्यक्षमनुमावत्, विश्वं न सत्यं भ्रांतप्रत्यक्षप्रमाणप्रमितत्वात् स्थूलोऽहं गौरोऽहमिति निश्चयवदित्य
नुमानान्मृषात्वमिति भावः। किंच श्रुतेर्न्यायदार्ढ्यमिति वेदप्रामाण्यात्मविषयत्वाबाधश्रवणाद्विश्वस्य मृषात्वस्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

21

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रा॰गी॰
२२

किंच विश्वं मृषा चेदनुमानं प्रमाणम् आह । दृश्यत्वादिति । अयं भावः मानसः प्रपंचो मिथ्या दृश्यत्वात् स्रग्उरगवत् । दृश्यत्वं च ज्ञानबाध्यत्वं । किंच प्रपंचो मृषा स्यात् प्रागभावाप्रतियोगित्वे असत्त्वात् स्वप्नवदिति श्रुतिप्रमाणमाह । नासदासीन्नो सदासीदिति श्रुतिः प्रागभावापि विश्वस्याभावं वक्ति किंच एष प्रपंचो मिथ्या कार्यत्वाद्घटवदिति निगमवाक्यान्निकेत्येव सत्यमिति कारणस्य सत्यतां वक्ति न तु कार्यस्येति । ननु यद्ययं प्रपंचः स्रगुरगवन्मिथ्या न हि

दृश्यत्वादेव मिथ्या स्रगुरगवदयं मानसः प्रपंचः प्रागभावाग्रसत्त्वाद्भवति च न मृषा स्वप्नवन्नासदासीत्
कार्यत्वाद्वै च मिथ्या घटवदिति निगमवाक्यान्निकेत्येव सत्यं सोऽनिर्वाच्यो मृषापि स्फुरति भगवतः सत्तया सद्वदेव ॥ २० ॥

सत्तया कथं भासत इति चेत्तत्राह । सोऽनिर्वाच्य इति । अनिर्वाच्यः सदसद्विलक्षणः प्रपंचो मृषापि प्रपंचाधिष्ठानस्य भगवतः परमात्मनः सत्तया सत्यत्वेन सद्वत्स्फुरतीत्यर्थः । सता सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा इति श्रुतेः । परमात्मा च सर्वेषामाधारः परमेश्वरः । विष्णुर्नामास देवेषु वेदान्तेष्वभिगीयत इति

राम॰
२२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ननु च विश्वोपादानमीशश्चेन्मृत्सुवर्णादिवन्न हि विश्वाकारपरिणामे विश्वनाशेन तस्यापि नाशः प्रसक्तिरिति चेन्नेत्या
शंक्याह। मायाधिष्ठानतयेति। सदसद्विलक्षणमायाया अधिष्ठानत्वमुपादानत्वं न अयस्कान्तमणिवत्संनिधिमात्रे
ण मायाकार्याणां कारणमित्यर्थः। अधिष्ठानत्वमात्रेण कारणत्वं प्रतीयत इत्युक्तेः। ननु न देहस्तव द्रष्टांशलाये
मायाधिष्ठानतया न खलु परिणतिर्विश्वमीशस्य तस्यांशत्वात्स्वहिवर्ण्यं वदति च निगमो ह्यन्निकेत्येववाचा
मायोपादानपक्षेऽप्यवनितलगतामीश्वरो निर्विकारः स्यात्संख्यानवद्यं विकृतिविरहितं वक्ति विश्वाद्यमीशं ११
यदंशः कामयत बहु स्यां प्रजायेयेति श्रुतिर्विश्वमीशस्य परिमाणं वक्तीति चेन्नेत्याह। न खलु परिणतिरिति कार्त्स्न्ये
न परिणतिरेकदेशेन वेत्युक्त यदि कार्त्स्न्येन परिणामस्तर्हि कार्त्स्न्येन तस्य विनाशित्वेन तस्य विनाशात्त्वम्प्रवादप्रसक्ति
रविनाशी वा अरेयमात्मानुच्छित्तिधर्मेत्यादिश्रुतिविरोधः प्रसज्येत। यद्येकदेशेन तदा विनिरंशस्यैकदेशा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा॰म॰
२२

मायात्माव्ययमद्वैतमपि नित्यतापातान्निष्कलङ्कश्रुतिविरोधाच्च परिणाम इत्याह तस्यानंशत्वादिति। न हि
विश्वं कीदृगिति चेत्तत्राह। सद्विवर्त्तमिति। सतो ब्रह्मणो विवर्त्तं विश्वं वदन्ति तत्र मायावाचारंभणं विकारो नाम-
धेयं मृत्तिकेत्येव सत्यमिति वाचारम्भणश्रुतेः। यथा सारो विवर्त्तः। स्वभेदिभेनानिर्विकृतेरनेकभूषणस्वरूपान
दर्शकत्वं विवर्त्तशब्दार्थ इत्यत्र प्रसिद्धमस्वरं गादेशादिवचं इमेट इति। तदत्र तदनन्यत्वमारंभणशब्दादिभ्य इति न्यायो-
पि विश्वं सद्विवर्त्तं वदन्तीति चकारस्यार्थः। तत्र केपि सिद्धान्तसोपाने। देशामात्वान्निरंशस्य परिणामोनुपप-
न्नो। विद्धिवर्त्तः एवं चायं स्वात्तुसंगवदि इत्यत इति विस्तरस्तु सिद्धान्तवैजयन्त्यां सिद्धान्तसोपानयोर्द्रष्टव्यः। किंच
विश्वस्य मायोपादानपक्षे स्वतरामीश्वरो निर्विकारः सम्भवतीत्यर्थः। मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वर-
मिति श्रुतेः। अत एव हि नित्यस्य ध्यायाविकृतिविरहितमिति। निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनमिति श्रुतेः

राम॰
२२
२१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ननु विश्वसर्गादीनां कर्त्तारो गुणावतारा ब्रह्मविष्णुरुद्राः प्रसिद्धाः कथं गोविंद इत्याशंक्याह एकोऽसाविति। एकोऽसौ वा
सुदेवः श्रीकृष्णस्त्रिगुणभिदेति प्रकृतेर्मायाया गुणानां रजः सत्त्वतमसां भिदा भेदे तैर्भेदैः भेदवान् ब्रह्मा विष्णुर्महेशो भवती
त्यन्वयः। न वास्तवः एकस्य परमेश्वरस्य संज्ञाभेदाद्भेदवत्ता न तु वस्तुतः तदेव स्फुटत्वेनाह जगतः सर्गस्थितिलयनिमित्त
मित्यर्थः स एकस्त्रिधा तत्र इति स्फुटेः संज्ञयैव न महति प्रकृतेर्गुणैर्युक्तः परः पुरुष एक इहास्य जगतः स्थित्यादये ह

एकोऽसौ वासुदेवः प्रकृतित्रिगुणभिदा भेदवान्ब्रह्मा विष्णुर्महेशो भवति च जगतः सर्गनाशे परेशः। स्वा
त्मारामोऽपि कामं नरपतिपतिवल्लीलया विश्वकर्त्ता वेत्याशंक्य स्वयं तं श्रुतिरपि वदतीत्येकमेवाद्वितीयं २२

शिवविरिंचिहरेति संज्ञाः येषां भिन्नत्वं खलु सत्त्वतनोर्गुणास्तु। सर्गस्थित्यंतकरणीं ब्रह्मविष्णुशिवाभिख्यां स संज्ञा
यातिं भगवानेकः एक जनार्दन इत्यादि स्मृतेश्च। सर्वाणि भूतानि वसंति यस्मिन् भूतेषु तेष्वंतर्यामितया च वसतीति वा वा
सुः। दीव्यतीति देवः स्वप्रकाशः स चासौ सः। सर्वाणि तत्र भूतानि वसंति परमात्मनि। भूतेषु च स सर्वात्मा वासुदेवस्ततः

23

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

१३

स्य तद्वदिति । तं विशिनष्टि परेश इति । परेषां ब्रह्मादीनामीशः सर्वेश्वरोऽथ विशिनष्टि स्वरूपेः प्रत्यक्स्वरूपः अक
र्तृस्वरूपः सर्वेश्वरः सर्वविशेषणविज्ञानसमस्तशक्तिः परमेश्वरस्य इति स्मृतेः । नन्वीशस्य स्वर्णकामत्वेन प्र
योजनाभावात् प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तत इति न्यायाद्धि सृष्ट्यादावप्रवृत्तेरिति चेन्न अत्राह आ
त्मारामोऽपीति । नरपतिपतिवन्महाराजवल्लीलया विश्वसर्गे प्रवर्तते लोकवत्तु लीलाकैवल्यमिति न्या
यात् । ननु द्व्यणुकादेः सहायस्य भगवतः कथं सहस्रसंभावनासामग्रीसमवधानाद्देवकुलालादेर्घटादिकार्य
कर्तृत्वदर्शनादिति चेन्नेश्वरस्य सर्वशक्त्याश्रयत्वेन सहायसंपत्त्या हि विश्वकर्तृत्वोपपत्तेः परास्य शक्तिर्विविधैव श्रूयते स्वा
भाविकी ज्ञानबलक्रिया चेति श्रुतेः । ननु वर्षमासादेः कार्यस्यानेकेषां कर्तृत्वदर्शनाद्विश्वस्याप्येकस्याथनेककर्तृतो
पपत्तिरिति चेन्न लाघवादेकेश्वरकर्तृतासिद्धिः स्वलभ्यान केवलं तर्कबलादपितु श्रुतिरपि वक्तीत्याह चेत्याशंक्येति च
श्च नैरकस्य वाद्वितीयमिति श्रुतिः सजातीयविजातीयभेदरहितमीश्वरं विश्वकर्तारं वक्तीत्यर्थः २२ इतिश्रीरा·श्रीमत्स्वा

राम· १२

पद्यान्ते देवशब्दं व्याचष्टे देव इत्यादिना दीव्यतीति देवः स्वप्रकाशः। ननु कथं स्वप्रकाशत्वं अस्मदादिज्ञा
नविषयत्वादिति चेन्नेत्याह स्वमविषयतयेति। स्वमात्मस्वरूपं यतोऽतोऽविषयतया नित्यज्ञानस्व

देवोऽयं दीव्यतीति स्वमविषयतया नित्यभास्यैव भासा सामर्थ्यं विश्वं विभातीति च
विस्फुरत्त्वं दृशि स्वप्रकाशं देवमीशम्। ब्रह्माद्यैरीड्यलिङ्गैः सुरवरपतिभिर्ध्येययाऽस्यापि
देवोऽयं मौनेन लभ्यतेऽतः समधिष्ठितनयात्प्रेमराहित्यभावात् ॥ २१

रूपत्वात् स्वज्ञानाविषयत्वात् स्वज्ञानान्तराभावाच्च। न चावस्थापातान्नित्यं विज्ञानमानन्दं ब्रह्म प्रज्ञानं ब्रह्मेत्यत्रा
यं पुरुषः स्वयंज्योतिस्तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतमित्यादिश्रुतिरूढं च विरोधाद्ध्यानकेवलं मि

२४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्यज्ञानस्य स्वरूपज्ञानादपि तु सर्वविशेषावभासकज्ञानात्मेत्याह तस्यैव भासा सर्वं विभातीति श्रुतिरेषा स्वप्रसंदे
वं स्वप्रकाशमीशं वदतीत्यर्थः। तस्यातिदुर्लभत्वमाह। ब्रह्माद्यैरिति। ब्रह्मविद्भिः कृतब्रह्मसाक्षात्कारैरपि
विद्यायाः स्वात्मविद्यायाः यापीठानीमपि योमौनलभ्यते सोऽसौ श्रीमन्गोपालिकामित्थं रितमधिगतइति
पूर्वपद्यगतेनान्वयोऽत्र द्रष्टव्यः। ननु ब्रह्माद्यैरगतियोऽयंः कथं मामादितस्त्याह। अत इति। अतो हेतोस्तेषां
समधिकृततया विश्वसर्गादौ मत्याराधिकारिणः अधिकारसमाप्तौ तेषां भगवत्प्राप्तिर्भविष्यतीति भा
वः। यावदधिकारमवस्थितिराधिकारिकाणामिति न्यायात्। यद्वा प्रेमराहित्यतः प्रेमरहितज्ञानेषां स्व
परमीश्वराणां भगवति प्रेमनैकेरभावादिति भावः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इदानीं वप्यानन्मसच्चिदानंददेहनित्यत्वमनुमानेन साधयति। देह इति। कपिभिर्द्वापकः शरीरेणस्तु निर्दे
शितावकः। नयोरैक्यं परं ब्रह्मसूक्ष्मं इत्यभिधीयत इति। ता इत्यस्य कृष्णस्य देहः पक्षः नित्य इति साध्यं। चिद्
घनत्वाद्धेतुः कालत्रयेऽव्यभिचारज्ञानघनत्वादानंदत्वात्सत्त्वात्सत्यत्वादिति हेतुत्रयं आत्मवदिति दृष्टांतः तत्र दृष्टांतमि
देहः कृष्णस्य नित्यो निगमागमगिरां स्वीकृतत्वात्सुहृत्त्वादानंदत्वात्सत्त्वान्मनीति शब्दवचसाप्यात्मवत्स्वप्रकाशः
नित्यं विज्ञानमानंदमिति च निगमो वक्ति नित्यत्वमेवोपधीयते नेत्यस्माद्वाक्यात्मदेकथमपि साक्षादेशानामजानां २४
दिस्तार्किकादिमते नित्यत्वेन दृष्टांतसिद्धेः। कपिलपतंजलिवेदव्यासानां मते च नित्यसच्चिदानंदात्मदृष्टां
तासिद्धेः। कृष्णदेहो नित्यः सच्चिदानंदत्वात् यन्नैवं तन्नैवं यथा भौतिकदेह इति व्यतिरेकानुमितिरप्यत्रेया।
न केवलमनुमानेन कृष्णदेहः नित्यः अपि तु निगमागमगिरा वेदस्मृतिवाक्याम्नातिशब्दनवचसापि स्वीकृतेत्याह गी

२५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रा॰श्र
२५

ष्णत इत्यर्थः। तमेकं गोविंदं सच्चिदानंदविग्रहं पंचपदं वृंदावनसुरभूरुहतलासीनमित्यादिश्रुतेः॥
निर्दोषपूर्णगुणविग्रह आत्मतंत्रो निश्चेतनात्मकशरीरगुणैर्विहीनः। आनंदमात्रकरपादमुखोदरादि
:सर्वत्र गः स्वगतभेदविवर्जितात्मा। सत्यज्ञानानंतानंदमात्रैकरसमूर्त्तयः। अस्पृष्टभूरिमाहात्म्या अ
पि ह्युपनिषद्दृशां। अस्यापि देव वपुषो मदनुग्रहस्य स्वेच्छामयस्य न तु भूतमयस्य कोपि। नेशे महि त्ववसि
तुं मनसांतरेण साक्षात्तवैव किमुतात्मसुखानुभूतेः। इत्यादिस्मृतेश्च। ब्रह्मणो हि प्रतिष्ठाहमित्यादि। अयमर्थ
:। ब्रह्मणः सविकल्पस्याहं प्रतिष्ठा प्रतिमा घनीभूतसच्चिदानंदरूपो निर्विकल्प इति। विस्तरस्तु सिद्धांत
वैजयंत्यां द्रष्टव्यः। अस्यार्थः। सोऽहं देव अनंतमानस्वप्रकाश अस्यापिप्यावद्भ्रमपवत्सकाल्पकवपुषित्यादि
नोकस्य प्रकृतस्य वत्सवत्सपादिरूपस्यापि तव वपुषः वतारस्य महि महिमानं मनसांतरेणापि निरुद्धेनापि

राम॰
२५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मनसाऽवमितं ज्ञातं केनापि ब्रह्मादिभिः केनेन समर्थः आत्मस्वरूपानुभूतेरानंदात्मनवस्थानवाचनारिणः

श्रीकृष्णस्य महिमानमवमितं नेशाद्वितिकिंपुनर्वक्तुमित्यर्थः यदा केनापि हं नेशोऽस्यन्यो किं पुनः शिवेत्यन्वयः

अज्ञाने हेतुः न तु भूतमयस्येति यद्भूतमयं वपुस्तज्ज्ञातं शक्यमिति दृढं वमौति कमात्मस्वरूपमिति मौति कस्य

रूपमतो वाङ्मनसातीतं ज्ञातुमशक्यमित्यभिप्रायः। सच्चीदृक् स्वप्रकाशः। न शायं प्रपञ्चः स्वयंप्र

तिरिति किं हेतुः न ह्ययं परप्रकाश्यः न वस्त्वपापातान्न स्वमात्मा सर्वमिदं विभातीति किं कारणं नित्यबोधात्मा श्रीकृष्णदेहः स्वप्रकाशः

सच्चिदानंदत्वादालोकवदित्युक्तमिति स्वप्रकाशत्वमित्यर्थः ननु तस्मापायवतामपि तेषां कुतो नित्यत्वमित्याशंक्याह। नित्य

त्वमेषामिति। एषां सच्चिदानंदानां नित्यं विज्ञानमानंदं ब्रह्मसत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रुतिभ्यो नित्यत्वं वक्तीत्यन्वयः श्रीकृष्णे

ऽपि देहदेहिविभागो नास्तीत्यत आह कथमपि मानामनाद्यनंतानां नित्यसच्चिदानंदानां भगवत्स्वरूपत्वेनासाधारणं तु कथं नहि

26

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा·श· ननु चेदं स्यादेतदिति। देहो नित्यो न भवेद्रूपवत्त्वाज्जन्मवत्त्वाद्दृश्यत्वात्सांशवत्त्वात्सावयवत्वात् घटपटव
१६ दिति चेन्नेत्याह। नोपाधेरिति। अनुमितिवचने देहानित्यत्वानुमानवाक्ये भौतिकत्वादुपाधेर्हेतोर्नानित्य

स्यादेतन्नित्यदेहो न कथमपि भवेद्रूपवज्जन्मवत्त्वाद्दृश्यत्वात्सांशवत्त्वादपि घटपटव
द्वदक्तीनंदनस्य नोपाधेर्भौतिकत्वादनुमितिवचने प्रोक्तदोषप्रसक्ते
र्नैवास्यान्मायिकत्वाद्दतिनिगमवाक्यमस्थिसानंददेहम् २५

क्तदोषप्रसक्तिरित्यर्थः। ननु च तद्देहस्य लीलामयत्वाद्भौतिकत्वं भवतु नाम मायिकत्वान्मायाकल्पितत्वा ग्रा·
दनित्यत्वं स्यादिति चेन्नेत्याह नैवेति सच्चिदानंदविग्रहमिति निगमवाक्यं नित्यदेहं वदति न मायिकं मायिकत्वे १६
प्रमाणाभावादित्यर्थः २५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

किंच सर्वैः कृतदेहानित्यत्वानुमानं कथं निरस्तं तत्र मानविरोधेन बाधितमित्याशंक्याह । देहानित्यत्वमानमिति
देहस्यानित्यत्वे मानमत्र मानं सपक्षदिशा घटस्थितिदानंदविग्रह इति निगमवाक्यानां नित्यानि देवपूर्णगुणविग्र
हेत्यादिस्मार्तशास्त्रवाणीभिर्बाधितं इत्यन्वयः । तत्र दृष्टान्तानुमानमाह । स्तुतिमन्त्रजकपालानुमानं यथेति । नग्नि

देहानित्यत्वमानं सपक्षदिशा निगमवाक्यादिभिरेव दूषितं स्मार्तशास्त्रवाणीभिः न हृदि स्तुतिमन्त्र
जकपालानुमानं यथैव तस्मात् मात्रादजस्य कथं न विक्लप्यन्ते योगिनो वेदवाक्यस्थया ।
स्कंदः श्रौतांशपञ्चमेण्ड्रवद्देवकदेहितत्वनौलीलयाञ्जुगमीत २६

रः कपालं स्तुतिमन्त्रप्राप्यं नरानां स्ववदित्यनुमानं नाशं स्पृष्टाश्रियमस्ते हं सदा शानलमाधिशोदितिस्मृतिर्यथा बाध
नएवतद्वदित्यर्थः । किंच सगवद्विग्रहस्यानित्यत्वेन जन्यत्वाद्देहानित्यत्वानुमानमपि बाधितमित्याह तस्मात् मात्रादि
ति स्मृतस्य सच्चिदानंदविग्रहस्य सगवतो जीववद्देहवत्जन्मा सा वानित्यत्वमित्यर्थः । न जायते म्रियते वा कदाचिन्ना

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

२७

यं कुतश्चिन्न बभूव कश्चिदित्यादिश्रुतेः। किंच तस्मादात्मनस्त्वं कञ्चन कदाचिद्विकृतये विकारा यास्का य
स्कैः षड्भिः प्रतिपादिता जायतेऽस्ति वर्द्धते विपरिणमतेऽपक्षीयते नश्यतीति षड्विधा न भवेयुरित्यर्थः। ननु दे
वक्यां जन्मबाल्यादीनां श्रवणात् कथं षड्भावविकारराहित्यमित्याशंक्याह। देवकदुहितृजननादिति। देवकी
देहे लीलया प्रादुर्भूतस्य न तु जीववद्योनिसंबंधेन कर्माधीनतयाऽस्तीत्यर्थः। तस्य च नित्यमुक्तत्वेन धर्माधर्मा
भावाददृष्टाभावः चकारः उक्तसमुच्चयार्थः। लीलया प्रादुर्भावेन केवलमपि तु बाल्यादीनामपि। तस्मात्तु
रूपं दृष्टान्तमाह। प्राच्यां पूर्णेन्दुवदिति पूर्वस्यां दिशि यथा पूर्णेन्दुराविर्भवति तद्वदित्यर्थः। ननूक्तां ननोमनगन्मंग
लमत्युत्तां शममाहितं परस्मत्तेन देवी। रूपाय समर्चात्मकमात्मस्तं काष्ठा यथा मंदकां मनस्तः। देवक्यां देवरू
पिण्यां विष्णुः सर्वगुहाशयः। आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कल इति ॥ १८ ॥ श्रीकृष्णाय नमः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ननु जीववद्देहदेहिभेदप्रतीतेः कथं देहेन सह सच्चिदानंदस्य भगवतोऽभेदाभावः साधनः इति चेन्न भेदस्यौपचारिकत्वा
दित्याशंक्याह। साकारत्वमिति। श्रुतेः। साकारत्वं सच्चिदानंदशरीरत्वं श्रुतीश्चस्मृतिनिगमवचोभिर्निर्णीतं भेदं निगमभेदं च किं
हि कथं भेदप्रतीतिरित्यत आह। वा हार्दमिति। वा हार्दः शिरोवदभेदेऽपि भेदस्यौपचारिकोऽसत्वात्तेन वास्तवः परमार्थश्चिद्घनत्वा

साकारत्वं श्रुतेः स्मृतिनिगमवचोवक्तिनिर्णीतभेदं वा हार्दं देहभेदो न भवति वपुषो वास्तवश्चिद्घनत्वात्। सत्त्वोद्रेके
ण सम्यक् प्रकटितपरमानंददेहः स्वतंत्रः सत्त्वे हत्वे भजतां स्फुरति स विमलोऽसौ निजप्रक्रमं कुंदः ॥ २९ ॥

द्वपुषश्चेत्यर्थः। ननु सत्त्वं नचेष्ठानरिदं निजं नवेदित्यादिना स्तुतस्य सत्त्वमूर्तेर्भगवतः कथं सच्चिदानंदशरीरत्वमित्यादिशंक्या
ह सत्त्वोद्रेकेणेति। सत्त्वगुणस्योद्रेकेणातिशयोत्कर्षेण सम्यक् संपूर्णतया प्रकटितः आविष्कृतः परमानंदस्वरूपो देहो
येन सः। अयं भावः परमेश्वरस्य सच्चिदानंददेहाविर्भावे शुद्धसत्त्वगुणस्योपयोगो न तु सत्त्वगुणो देह इति श्रुतिस्मृतिभिः

२८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रोधात्मस्वेनसंप्रतिश्रुतिं स्वयंनमेषामित्यादौ करणत्रयस्वगणात्तु । तथा । प्रकृतिं स्वामधिष्ठाय संभवाम्या
त्ममायया । हृदिस्थं ईश्वरं यामासमायोपात्तविग्रहमित्याद्यपि द्रष्टव्यं । नहि कथं सर्वं न चेष्टानशितिचेन्न सत्यं
सतोभावः सत्त्वं सत्यमिति यावत् । सत्यं निजं वस्त्वित्यर्थः । नन्वहेतुः स्वतंत्रो भवतु जीववत् परतंत्रः कर्म्मा
ईश्वरज्ञातसर्वशक्तित्वमिति भावः । नन्वेवंभूतस्य तर्हि कथं लोकानां दृश्यदृश्या शंक्याह । स मुकुंदो मुकुंतु
क्तिं ददातीति तथा । प्रेमभाजां प्रेमभक्तानां मुक्तिदः सन् स्नेहाद्भिर्विंदावनादौ स्फुरति प्रकाशते । नहि
देहसंबंधेन जीववत् संसारित्वं दोषमिति चेन्नेत्याह । नित्यमुक्त इति । तस्याविद्यावरणाभावान्नित्यमुक्त
त्वमित्यर्थः । योऽविद्ययानुक्तः स तु नित्यवद्धा विद्यामयो यः स तु नित्यमुक्तः । कृष्णमेनमवेहि त्वमात्मानमखि
लात्मनां । जगद्धिताय सोप्यत्र देहीवाभाति मायया इति स्मृतेः ॥ २७ ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नन्न चोद्यं स्वयति। स्यादेतदिति। ईशे श्रीकृष्णे देहं परित्यज्य वैकुण्ठलोकं प्रकर्षेण गतवति सति रुक्मिण्याद्या
महिष्यस्तं श्रीकृष्णमनु पश्चान्न देहमाश्लिष्यालिंग्य वह्निं समध्यगा विशन्न द्विष्टाः। तथा च वैष्णवे। गतेन स्मिन्स्म
गतान्न संयोत्यात्मानमात्मनि। न स्यात्तमातृषं देहमनीत्य त्रिविधां गतिं। अष्टौ महिष्यः कथिता रुक्मिणीप्रमुखा

स्यादेतद्देहमीशे उगतवति परित्यज्य वैकुण्ठलोकं रुक्मिण्याद्या महिष्यस्तमनु समविशन्वह्निमाश्लिष्य देहं
मातुश्च त्यागमेव प्रवदति वृषभस्यागमेवं कर्त्रीर्ज्ञानित्याद्देहः कथं स्यादिति च वदसि चेद्भूमहे न तत्र सत्यं   २८

स्तुयाः। उपगुह्य हरेर्देहं विविशुस्ता हुताशनं। मौसलेच। कृत्वा भारावतरणं पृथिव्याः पृथुलोचनः। मोचयित्वा ततो
धात्रः कृष्णः स्वस्थानमुत्तमं। श्रीभागवतेच। यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः। भूभारः क्षपितो येन जहौ
तच्च कलेवरमित्यादि पुराणवाक्यात् देहस्यानित्यत्वश्रवणात् कथमस्य देहो नित्यः स्यादिति वदसि चेत्तत्र चोद्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वयं ब्रूमहे। सत्यमिति। मानुष्यत्यागं मनुष्यताकारमेत्यागमेव वस्तुतस्त्यागमेवं कवीन्द्रा वेदयामः। प्रवक्ति
न तु मस्त्विदानं दाकारं वर्तमानस्य त्यागं तस्य स्वरूपेणेन नित्यत्वात्। वैष्णवे च तथोक्तं। तस्मात् मानुषं देहमि
ति मनुष्याकारता लोकप्रांतिनात्याग एव देहत्याग इत्यर्थः। तथैव देहं च तत्र्वसंज्ञा वैकुंठं गतवानिति वा
क्यस्यार्थः। तत्रैवोक्तं। गतः सदेहः श्वेतश्च वर्तमानं [illegible] स्वर्गं तं। प्राणिपत्याह वैवैतं प्रसीदेति चित्रनः। मनः। मोमलेच्छ
। अथापश्यत्सुरूपं योगात्मुक्तं पीतांबरं लुब्धकोऽनेकशाङ्गी। महात्मानं च पराद्धं मनन्त्यपादो ज्ञराजा दहेशं किंता
मिति। न हीक लेवरमंतरपादित्यर्थः। तृतीये चोद्भवेनोक्तं। प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणां। आदायांतर
धाद्यस्तु स्वबिंबं लोकलोचनमिति। स्वबिंबं स्वीयविग्रहं। एकादशे च। लोकाभिरामां स्वतनुं धारणाध्यानमंगलं।
योगधारणयाग्नेय्याऽदग्ध्वा धामाविशत्स्वकं। मौसले [illegible] नारायणः [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्मा योगाचार्यो रोदसी व्याप्य लक्ष्म्या व्याप्तं आत्मः त्वं महात्मा: उमेयमिति। तथापि शोभस्थितिसंभवाद्ध्येष
नन्वहेतुर्यद् शेषशक्तिः कृष्णो नैतत्सगुणत्वं वस्तुतस्तु शेषित्वं मर्त्येन किं स्वस्थगतिं प्रदर्शयितुं। ननु दृष्टिमुत्तेन देहेन कि
मिति चैत्कुंठनगतवांस्तस्य शाहा नैतदिति निराकारं वस्तु वैकुंठं प्रतिनेतुं नैतत्तत्कीदृक्तत्तमलाशेषं स्वतंत्रत्वाद्
तुर्त्तुं साकारेण गतवानित्यर्थः तत्र हेतुमाह मर्त्येन मर्त्याकारेण देहेन मनुष्याणां स्वगतिमपि स्वरूपगमनं किंकि
मात्के पेते निदर्शयन्नु इति मनुष्याणां तु रागांधावारयन्निति भावः॥ यत्तु शरीरं वासुदेवस्य रामस्य च महा
त्मनः। सत्कारं लंभयामास वृष्णीनां वसुदेवात्मजः॥ ततः शरीरे रामस्य वासुदेवस्य चोभयोः। अन्विष्य दाह
यामास पुरुषैराप्तकारिभिः इति पद्यद्वयं तत्रकांतरे केचित्पठंति एवं तयवाक्येन तदनाकरमिति स्ववं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गम्यते॥ नश्चैवचेद यामं शक्ति वर्तनं सयत्नाकाम्॥ यश्च मेघवपुः श्रीमान् बृहत्पङ्कजलोचनः॥ स
कृष्णः सह रामेण त्वत्स्थाने हि स्थितिं गतः॥ शोचणं मा गास्त्वं च पर्वतं स्वैवचालनम्॥ न मम सः पतनं
चैव शैत्यमनेनैव च॥ अथ देयमिवामाति विनाशं शार्ङ्गधन्वन इति॥ तेनैव वनलदश्यामलदे-
हेन चतुर्भुजाकारेण श्रीकृष्णो वैकुण्ठं गन्तव्यानीति वर्तनं सयत्नामित्रायपइत्यर्थः २८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

किम

यदुक्तमष्टौ महिष्यः कृष्णस्येति तत्र समाधत्ते। चिह्नेनेति। श्रीकृष्णस्य चिह्नानां देहे चिह्नेनालिंग्यमाना
रुक्मिण्याद्या महिष्यो वह्निमाविश्य उविश्यन्ते श्रीकृष्णमनु पश्चात्सहगमनात्तमनुजग्मुरित्यर्थः। अन्यथा तु
राणमहाभारतयोर्विरोधापत्तेः। तथा च मौसले रुक्मिणी त्वथ गांधारी शैव्यातां हैमवती तथा। देवी हैमव
चिह्नेनालिंग्य देहं तमनु सहगता वह्निमाविश्य नाकाः स्वर्गे पार्थेन दृष्टोऽभिनवजलदश्यामदेहः सुवेषः
साहस्येनोपलक्षः सकलविभवैः पूर्वदृष्टेन तेन श्रीकृष्णः सेव्यमानो दरकमलगदाचक्रहस्तोऽर्जुनेन २९
नी चैव विविशुर्जातवेदसमित्युक्तहरेर्देहाश्लेषं विना जातवेदःप्रवेशश्रवणात्। किंच स्वर्गपर्वणि युधिष्ठिरेण
स्वर्गलोके यथापूर्वदृष्टस्वरूपस्यैव सद्दृष्ट इत्याह। स्वर्गे पार्थेनेति। पार्थेन युधिष्ठिरेण तेन तादृशेन साहस्येन
स्वाराहादो पूर्वदृष्टेन चतुर्भुजाकारमंदस्मितास्फुल्लमुखारविंदकमलदलविशालविलोचनेनलक्षणेनोप

31

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लक्ष्येणानन्तः किंचिदपि विलक्षणेन सह एवायं श्रीकृष्णोहं इत्युच्यः। अस्याकारणलक्षणमाह स कीदृ
क्षः। अभिनवजलधरवत् श्यामो देहो यस्य सः। कुटिलकुंतलश्रीवत्सपीतांबरवनमालाकौस्तुभामर
णादिना सुशोभमानो वेषो यस्य सः। पुनः कीदृक्षः सकलविभवैरणिमाद्यष्टैश्वर्यैः सहसंयुक्तेन सेव्य
मानः। पुनः कीदृक्षः दरकमलगदाचक्राणि हस्ते यस्य सः॥ ॥तथा च स्वर्गपर्वणि॥ ॥ददर्श त
त्रो विंदं ब्राह्मेण वपुषान्वितं। तेनैव हि स्वरूपेण माहेश्येनोपशोभितं। दीप्यमानं स्वकवपुषा दिव्यैरस्त्रै
रुपस्थितम्॥ उपास्यमानं वीरेण फाल्गुनेन सवर्चसा। यथा स्वरूपं कौंतेय पश्यैवमसुसूदनमि
त्यादि॥ ॥१७॥ ॥ ॥श्रीकृष्णायनमो नमः॥ ॥ ॥ ॥ ॥

पूर्वपद्ये नित्यमुक्तो मुक्तं इत्युक्तं नित्यमुक्तस्य निर्देहत्वात्कथं देहत्वान्नित्यमुक्त इत्याक्षिपति सवीशमिति निःशारीरम
शंविद्धं नेन देहकरसं नित्यमुक्तमशरीरं वावमनं न श्रियाश्रियेस्पृशतः। तु शरीरं शरीरेष्वनवस्थेष्ववस्थितं महान्तं विभुमात्मा
नं मत्वा धीरो न शोचतीत्यादि निगमो निगदव्याख्यातस्त्वमीश्वरं सदेहं देहवन्तं वेचे यदि त्वया पिता हि मागवतो नीव वदेहवत्वया।
सवीशं निःशरीरं निगदति निगमश्चिह्नं नित्यमुक्तं ब्रूषे तं चेन्न देहं भवति भगवतः संस्थनिर्दुर्निवारा मुक्ता
नामात्मनां च बन्धमवधिमवयोर्नास्ति कश्चिद्विशेषस्तस्मान्निर्देहईशः प्रभवति जगतां पाणिपादश्च्युतीतः ३०
संस्थनिर्दुर्निवारानिवारयितुमशक्येत्यर्थः किंच मुक्तानामात्मनां जीवानामपि च शाश्वतार्थे सदेहत्वे बन्धमवधिमवयोः
संसारमोक्षयोः कश्चिद्विशेषो नास्तीत्यन्वयः। उपसंहरति तस्मात्कारणाज्जगतामीशो निर्देहो देहरहितो भवति तस्मा
त्स माहपाणिपादश्च्युतीतइति। तथाच श्रुतिः अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः स वेत्ति वेद्यं न हि

32

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्वा॰ग्र॰
३२

नत्रोत्तरमाह। मैवमिति मोक्षे प्राकृतस्याविद्याकल्पितस्य वपुषः सप्रतिषेधोऽस्थूलमनण्वह्रस्वमपाणिपादमित्यादिना
निषेधः प्रवर्तते किं च कुत्रापि श्रुत्यादौ तस्य भगवद्देहस्य नित्यानंदस्य न निषेधः प्रवर्तत इति क्रियाध्याहारः कर्तव्यः नापि ना
हशदेहसंबंधेन नित्यमुक्तस्य भगवतो विद्यास्वरूपेणाविद्याकृतो बंधः संसारः प्रवर्तत इति शेषः विद्यामयोऽयः सवति

मैवं मोक्षे निषेधः प्रवर्तते वपुषः प्राकृतस्य प्रतिषेधो नित्यानंदस्य तस्य कथं न न हि सदेहे नित्यमुक्तस्य बंधः। वि
द्यात्मत्वात्तेषामपि ततनमसामात्मनामस्ति बंधो वा भावो विशेषः स्फुरति च समहान्याणितां मोहमात्रा ॥ ३०

न्यस्तत्राह। तदितरसर्वस्माद्विद्याविद्ययोरेव परस्परप्रत्यनीकत्वादिति भावः। यत्तूक्तं मुक्तानामपि सदेहत्वे प्रसक्तविभवयो
न कस्मिन्हि शेषरूतिन्नत्राह विद्यात्मत्वादिति विद्यास्वरूपत्वात्तेषामात्मनां मुक्तानां न बंधोऽस्ति बंधस्याविद्यानिर्मितत्वाद्विद्य
याः विद्यानाशेन कृतं बंधविनाश इत्याह। ननु तत्र सप्तानां तथा विधानां मुक्तिमात्रामुक्तानां प्राणिनां बंधाभावे न सञ्जन्नावर्तत इति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्यादेतदेकस्मिन्धर्मिणि निराकारसाकारत्वविरुद्धधर्मद्वयसमावेशायोगात्कथं साकारत्वं नित्यमिति चेन्न व्याघात इत्याशंक्य।
हन्त द्वितीये एकं निर्गुणं नमीश्वरं साक्षी चेता केवलो निर्गुणश्चेति श्रुतिर्निराकारशिरोऽसाकारसाकाररहितं वक्ति त्वमीश्वरं साकारं ब्रवी
षि एतद्द्वयं परस्परविरुद्धमहह त्वदेनिर्द्वितीये धर्मिणि न च युज्यते वा शब्दः स्वार्थे। किंच न तत्त्वमसत्त्वयादित्यधिकरणे वेदान्तानाम

नन्वेकं निर्गुणं तं श्रुतिर्निराकारशिरोऽवक्तपसाकारमीशं साकारं त्वं ब्रवीषि द्वयमहह न वा युज्यते निर्द्वितीये। वेदा
न्तावाक्यभेदो भवति न च मतेऽनेन तात्पर्यभेदाद्वैतापत्तिप्रसंगोऽपि च नरकभिदो नित्यदेहप्रवादे ३२

द्वितीये तात्पर्यावधारणादुभयत्र तात्पर्ये सम्मन्वयविरोधात्संभवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यत इत्यधिकरणविरोधात्।
न च मतमनुपपन्नमित्याशंक्याह। वेदान्तानां वाक्यभेद इति वेदान्तानां निराकारसाकारप्रतिपादने न द्वयोरपि तत्र तात्पर्यभेदान्न च मते वाक्यभे
दो दूषणं भवति किंचोभयप्रतिपादने द्वैतापत्तिप्रसंगोऽपि च न भवति नरकभिदः श्रीकृष्णस्य नित्यदेहप्रवादे नित्यशरीरत्वकथायामित्यर्थः
३२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सिद्धांतमाह। सत्यमिति। वेदो वेदांतो हि द्विविधः साकार इति पादको निराकार इति पादकस्तस्मा एकस्मिन्नेव काले
एकाधिकारिणि साकारनिराकारोपासनाद्वयविरोधात्कर्मब्रह्मकांडाधिकारिभेदवदुपासनाकांडाधिकारिभे
देन व्यवस्था सिद्ध्यतीत्याह अधिकारिद्वितयमिति भिद इति। निराकारसाकारोपासकद्वयस्य मतिभेदेनोपास्येश्वर
सत्वं वेदोधिकारिद्वितयमिति भिदोपास्यभेदात्तु मार्गी स्मृतेर्द्वे ब्रह्मणी ते गतगुणसगुणे स्मृतिभिर्वेदितव्ये। नो
पास्यद्वयभेदो निगमगणगिरां चिद्घनानंदसांद्रे तात्पर्यार्थाद्द्वितीये हह इति न च सम्वेद्वैतवादप्रसक्तिः ३२

साकारनिराकारस्वरूपद्वयप्रतिपादनभेदात्तु मार्गी स्मृते द्वे ब्रह्मणी वेदितव्ये इति स्मृते द्वे ब्रह्मणी व्याख्याति गतगुण
सगुणे निर्गुणसगुणे स्मृतिभिर्वेदांतार्थतत्त्वविद्भिर्वेदितव्ये इत्यर्थः। द्वे ब्रह्मणी वेदितव्ये मूर्त्तं चैवामूर्त्तं च स्वरूपं द्विविधं
प्रोक्तं सगुणं निर्गुणं चैकमित्यादिस्मृतेः। सर्वशक्तिमयो विष्णुः स्वरूपं ब्रह्मणोः परं मूर्त्तं यद्योगिभिः पूर्वं योगारंभेषु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ष्टिं त्यजेत्। स परः सर्वशक्तीनां ब्रह्मणः समनंतरः। मूर्त्तं ब्रह्म महात्मा सर्वब्रह्ममयो हरिः। तत्र सर्वमिदं प्रोतमो
तं चैवाखिलं जगत्। ततो जगज्जगत्तस्मिन्स जगच्चाखिलं स्थितं। क्षराक्षरमयो विष्णुर्बिभर्त्यखिलमीश्वरः इति चैत
स्मृतेश्च। तथा नारायणीये। ईश्वरो हि जगत्स्रष्टा प्रभुर्नारायणो विराट्। भूतांतरात्मा वरदः सगुणो निर्गुणो
पि चेत्यादि श्रुतिस्मृत्योः श्रूयमाणे सगुणनिर्गुणरूपेण पारमार्थिकाभेदेऽप्यवस्थाप्रपंचैरिति भावः। तत्र
क्रमेकस्मिन्धर्मिणि विरुद्धधर्मद्वयासंभवः इति चेत्सत्यं साकारनिराकारयोः सच्चिदानंदस्वरूपत्वेन तादात्म्या
द्विरोधाभावः। विजातीयधर्मान्तरप्रवेशेन हि विरोधप्रसिद्धिर्न तु सजातीयेन। न च निराकारे साकारतावैधर्म्यं त
त्वेशाद्विरोधः स्पष्ट इति वाच्यं सकलानामप्यसहायलीलया तत्तदाकारताप्रतीतेरचिन्त्यमहिम्नो भगवत इत्यलमति

84

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कृतकोसिनिवेशेनानंतकंश्रीभागवतेनहिविरोधइत्यर्थंभगवत्तत्परिगणितगुणगणईश्वरेऽनवगाह्यमाहा
त्म्यऽर्वाचीनविकल्पविचारप्रमाणानामस्फुरत्तर्कशास्त्रकलितांतःकरणदुरवग्रहवादिनांविवादानवसर
इत्यात्मापरिज्ञानमयोविवादोयस्मिन्निति नास्तीतिप्रिदार्थनिष्ठः। अर्थोपिनैवोपरमेतत्संमन्नः पराहृन्नाधि
यांस्तु लोकादिति। अचिंत्याः खलु ये भावा न तांस्तर्केण योजयेदिति च वैष्णवे। नैषा तर्केण मतिरापनेयेत्या
दिश्रुतेश्च। न च नस्यात्तेनापि परस्पोभयलिंगमित्यधिकरणविरोध इति वाच्यं। मोक्षसन्निहितावस्थायामद्वि
तीयद्रष्टा निर्गुणब्रह्मभावनासंभवान्निर्गुणसाक्षात्कारादेव मोक्षप्रसिद्धेः। यद्वा निराकाराधिकारिणं प्रति
ध्याननियमात् साकाराधिकारिणं प्रति साकारप्रतिपादकश्रुतीनां प्रामाण्यादविरोधः। अन्यथा साकारप्रति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पादकल्पितस्मृतीनां वाच्यः प्रसंगेन । अत एव स्वयं स्वत्र इत्यन्नागतमाकारनिराकारब्रह्मोपासकयोर्ब्रह्मे
णक्षेत्रैर्भिन्नरूपत्वासादिन्यादित्यस्मिन् सूत्रे श्रुत्या श्रुत्याधिकारिभेदेन निराकारसाकार इति पादकल्पयोरर्थे वस्त्वा
स्तु परामादिति । ननु कल्पसमयत्रनान्यथैवमस्तु यमस्त्र विरोधो वाक्यभेदश्चेति चेन्नत्राह नेवास्यादिति नियमगण
गिरं चिहूनानंदस्यांद्वेः द्वितीये हहनिबद्धलाणिनान्यर्थान्नत्परत्वाद्धेतोर्न समन्वयस्तत्र विरोधो न वा वाक्यभेददो
षश्चेत्याह । वाक्यभेदद्दु नि । किं वा मयपयोः सच्चिदानंदस्वरूपत्वाद्धैतोपनिरित्याह । न च समदेहेन वाद प्रसक्तिरि
त्यर्थः । विस्तरस्तु सिद्धांतवैजयंत्यामवेक्ष्यः ॥ ३३

35

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ना॰ मा॰ ३५

किंच निर्गमकानां वाक्यभेदेऽपि न दोष इत्याशंक्याह । यद्वेति । अमीषां वेदवचसां निराकारसाकारप्रतिपादकवाक्यभेदेऽपि विदुषां साकारविचारपंडितानामल्पापि हानिर्न वर्तते । कृतमस्तु दृष्टांतेन साधयति कर्मकांडब्रह्मकांडार्थयोर्वेदैकप्रकरणत्वेऽपि भेदेन यथा वाक्यभेदान्न दोषः । श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां पारपारदौ

यद्वा वाक्यप्रभेदेऽन्न भवति विदुषां हानिरल्पाप्यमीषां कर्मब्रह्मार्थभेदप्रकरणविभिदा वाक्यभेदेन दोषः ।
एवं वा भेददोषो न हि खलु सगुणोपासनाकांडभेदान्नद्वैतार्थभेदेऽपि च नच भवति न भेदलेशावकाशः ॥ ३४ ॥

ना॰ ३

र्बल्यमर्थविप्रकर्षादिति न्यायात् एवं तथा सगुणोपासनाकांडभेदान्न हि खलु निष्कृतं वा भेददोषो भविता भवतीत्यर्थः । तद्वत्साकारे सगुणोपासनाप्रतिपादकवाक्यानां तात्पर्यभेदेऽपि दोषलेशावकाशो न च भवितेत्यन्वयः ॥ ३४ ॥

रा॰ ३५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इदानीं भगवद्वाक्येन साकारनिराकाररूपद्वयं दर्शयति। सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखं। सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति निर्गुणं रूपं स्वकीयं रूपं सगुणं स्वयमपि भगवान्षड्गुणैश्वर्यवानवक्तीत्यन्वयः। ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गने निरुक्तेः। सगुणेन भगवति वक्ष्यीकृत्ये।

सर्वस्मिन्पाणिपादं नहि किमिव सगुणं वक्ति सर्वेंद्रियेभ्यो निस्त्वं रूपं निर्गुणं च स्वयम
पि भगवान्सर्ववेदार्थविद्वान् सोऽमायोपाधिकं तं सगुणमिति वचः श्रूयते न
त्वयस्मात्कस्मात्कारश्चिदात्मा प्रभवति जगतामीश्वरो नित्यदेहः ३५

नित्या गुणाः श्रूयंते। सत्यं शौचं दयाक्षांतिस्त्यागः संतोष आर्जवं। शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतं। ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः। स्वातंत्र्यं कौशलं कांतिर्धैर्यं मार्दवमेव च। प्रागल्भ्यं प्रश्रयः शीलं सह ओजो ब

36

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लंमगः। गांभीर्यं स्थैर्यमास्तीक्यं कीर्तिर्मानोऽनहंकृतिः। इमे चान्ये च भगवन्नित्या यत्र महागुणाः। प्रार्थ्या महत्त्वमि
च्छद्भिर्न वियंति स्म कर्हिचिदिति स्मृतेः। सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितं। असक्तं सर्वभृच्चैव निर्गुणं गुणभो
क्तृ चेति स्वरूपं निर्गुणं च भगवान् न वक्तीति संबंधः। स कीदृक् सर्ववेदानां कांडत्रयाणां प्रतिपाद्यार्थविद्वान्
सर्वज्ञ इत्यर्थः। ननु ब्रह्मवत्ती कोपामनेऽश्रूयमाणं सगुणं वा चंद्वे न गुणमीतेति तस्माया रोपितं सत् वास्तवमि
त्याशंक्याह। नोपाधेरौपाधिकमिति। न तु मिथ्यं सगुणं भगवत्स्वरूपं मायाकल्पितमिति वचनत्रकृतः स्मृ
तेर्यस्मान्न श्रूयते। अतः कथाकारः सदानंदाकारः चिदात्मा भगवान् ब्रह्माण्डनामीश्वरो नियंता नित्यदेहः अज
यति सर्वोत्कर्षेण वर्तते तत्त्वोपसंहारः ३५ श्रीकृष्णाय परब्रह्मणे नमः श्रीरामः शरणम्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नन्वेके चिन्नाः किंकालीलाविर्भूतमसच्चिदानंदघनविग्रहमीश्वरस्य तुर्धरमित्याहुस्तान् विशतिपन्नान्निराकर्तुमाह
मन्यंत इति। मुरारेर्नित्यं चिद्घनदेहं ताः किं कान मन्यंते। न त्वहेतुः। एवं तु रजउषियइति एतत्तुरं यथास्यात्तथा जडा मंदा
नत्वहं स्मयाहि लीलीवीर्यं यंते। कथं मांसशान्त्मारावयववान्देहो घटवदनित्यः। अन्यतापाथवन्नाव अनित्योऽनन्त

मन्यंते ता किंकान त्वत्र रजउषियो नित्यदेहं मुरारेः मांसशत्मादेरनित्योऽसवनितिमव उनजं यतायाथ वत्वात्।
जीवानद इव प्राणीते जगदवनकृते विग्रहे मंत्रविषयइ अन्तावेशावसंत्यजति सव वतुः कार्यमीशः प्रकृत्या ३६

वतीत्यन्वयः आदिशब्देन दृश्यत्वपरिच्छिन्नतादेर्ग्रहणं किं च लगादीशस्य धर्मो धर्मादृष्टाभावाज्ञन्यदेहोऽपि कथं चिन्न घटते कु
तोऽनित्यः नहि कथं कान्तिस्मृतोर्विग्रहवानीश्वरः श्रूयत इति चेन्नत्राह जीवानामिति जीवानां स्वभावत्वादृष्टाभ्यां जनिते देहे जगद
वनकृते जगत्पालनाय मन्त्रावेशवत्सम्यक्प्रविश्याभक्तानां मनोवनिग्रहात्तु यह रूपं कार्य भक्ताइनकमर्दीश स्वं पुनः संत्यजतीत्यर्थः ३६

३७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा॰ग॰ हृषयतिमैवं स्यादिति। नीवाहष्टश्रणीते विग्रह इति। यदुक्तं शरीरे स्नाहृक्षवऋर्न स्यात्सश्रमाणात् स
३७ माणोऽप्यानन्तरुक्तं तत्राह। हि यस्मादागमे स्मृतिवचसि वा ता हृत्ववृर्न स्मूयते। स्वस्य वक्त्रः कीदृक्षा। स्व

मैवं स्यादप्रमाणाहृत्ततः मलचिदानंदरूपं स्वशरीरैः स्वैरेवस्यागमेहि स्मृ
तिवचसि न वा श्रूयते तादृशस्याऽऽरादेहाऽनित्यताऽयामवृमितिवचनेमौ
निकनायकपादैः स्वैरं लीलाशरीरं स्मरणकृस्वागीश्वरं वावदीति ३७

मलचिदानंदरूपं नित्यचैतन्यानंदस्वरूपं। विषयसंबंधिज्ञानानंदव्यावृत्त्यर्थममलपदं। तन्नित्यमनादि राम॰
सापेक्षं वा। स्वैरं ब्रस्यस्वतंत्रेऽब्रह्मा। नहि कीदृक्षवृत्तरस्यत्वह। स्वैरं यथा स्यात्तथा लीलया विर्मितशरीर ३७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मीश्वरं स्मृतिनिकरवाक्यप्रमाणं वादी निरतिशयेन वक्ष्यतीत्यन्वयः । इच्छागृहीताभिमतोरुदेहः । यद्यपि
यातत्तरुणाय विस्नावयंति तत्र हेतुः प्रणयप्रेमस्तुप्रहार्थया लीलया वृतनतेरनुरूपरूपेत्यादिस्मृ
तिभ्यः । ननु कंसावधवध्वादि हेतोर्देहानित्यत्वमितित्याह । आदिहानित्यतामनुमितिवचनेदेहानि
त्यतानुमानवाक्ये भौतिकत्वाद्युपाधिः प्रयुक्त इति शेषः । आदिशब्देन मायिकत्वादीनां परिग्रहः तेन
भौतिकत्व मायिकत्वादिरूपाधिस्तेन भौतिकत्वे सति यत्सावयवं तदनित्यमेवं मायिकत्वे सति सावयत्वा
वयवं यज्जन्यं यच्चदृश्यं तदनित्यमित्यादित्वयमर्थः । अतो न नित्यदेहानुमाने दोषलेशावकाश इ
ति वाक्यार्थः ॥ ३७ ॥ श्रीमन्नंदनंदनो जयति ॥ ॥ श्रीमद्वृंदावनचंद्रो जयति ॥ ॥

38

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा·सू·
३८

किंचतार्किकाश्च पिशाचपादुकान्यायादकामा अपि जगत्कर्तुरीशस्य नित्यदेहमन्यथानुपपत्त्यावश्यमुररीकरिष्यंतीत्याह
मंस्यंत इति तार्किकाः क्षित्यादिकं सकर्तृकं कार्यत्वाद्घटवदित्यनुमानाज्जगन्निर्माणे श्वरः सिद्ध इति कर्तृत्वं चोपादानगोचराप
रोक्षज्ञानचिकीर्षाकृतिमत्त्वं पक्षधर्मताबलाच्चानित्यत्वबाधान्नित्यज्ञानेच्छाकृतिमत्त्वमीशस्य सिध्यतीति च तर्कबलाज्जगत्कर्तार

मंस्यंते नित्यदेहं गलचरणन्यायात्तार्किका विश्वकर्तुर्लोके कुंभं कुलालो विरचयितुमलं देहवानेव यद्वत् नद्दे
हं विना चाखिलजगदिदं स्रष्टुमीष्टे परेशः नित्यो वा स्याच्च नित्यं वपुरखिलकृतो नित्यविज्ञानवत्स्यात् ३८

मीश्वरमंगीकुर्वाणा गलचरणन्यायादकामादपि विश्वकर्तुरीशस्य नित्यदेहं मंस्यंते कथं कुंभकार दृष्टांतेनेत्याह लोक इति देहवा
नेव कुलालो यद्वद्यथा कुंभं विरचयितुमलं समर्थो भवति न तु देहव्यतिरेकेण न तद्वत्तथा देहं विना निखिलजगदिदं विविरचितुं परेशः
स्रष्टुं नो ईष्टे न शक्तः चकारो हेत्वर्थे अतोऽन्यथानुपपत्तितो नित्ये देहे वा भावे अखिलकृतो जगत्कर्तुरीशस्य नित्यविज्ञानवन्नित्यं वपुः स्यादित्यर्थः ३८

रान
३८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्याक्षिपति न स्यादिति। अंकुरादौ कार्ये कश्चिदपीश्वरस्य वपुषो नोपलंभाद्धेतोः यदीशस्य शरीरं स्यात्तर्हि केनचित्कदाचि
दुपलभ्येत न किंचित्तं नोपलभ्यते। मैवमिति। तत्राथांकुरादौ कार्येपि न स्य वपुरस्तीत्यनुमतः। कार्यमात्रे शरीरवत्कर्तृकत्वव्या
प्तेः कुंभकर्तुर्निदर्शनाद्दृष्टांतात् अंकुरादिकार्यं शरीरवत्कर्तृकं कार्यत्वात् कुंभवदिति न च द्व्यणुकादीनां कार्यत्वेपि शरीर

न स्यात्कार्येऽङ्कुरादौ कश्चिदपि वपुषो नेश्वरस्योपलंभान्मैवं तत्रापि कार्ये वपुरस्तीत्यनुमतः कुंभकर्तुर्निदर्शनात्
कार्यत्वे कर्तृतायां च न च निलघुता देहवत्कर्तृकत्वेऽप्यानिर्णीतमिति चेन्न हि खलु लघुता बाधिता यत्कृतः स्यात् ३९

वत्कर्तृकत्वाभावादिति वाच्यं तत्रापि शरीरवत्कर्तृकत्वानुमानसंभवात् घटादेरवयवत्वेन संयोगाभावाद्द्व्यणुकादिकार्यता
संप्रतिपन्ने ह्यनंतु च कार्यत्वे कर्तृतायां कल्प्यमानायां गौरवं न स्यात्तन्मते तु कार्यत्वे शरीरवत्कर्तृकत्वे व्याप्तिः कल्प्यमाना
गुर्वीति चेन्न हि खलु लघुता बाधिता यत्कृतः स्यादिह वत्कर्तृकत्वव्याप्त्यंशे लघुता बाधितास्यादित्य सूयः अनुमानविरोधेन तर्कस्य

३९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नन्वीश्वरस्येच्छामात्रादंकुरादिकार्योत्पत्तेः किंनित्यदेहस्वीकारेणेति पुनराशंक्य निरस्यति संकल्पमा
त्रादंकुरादीन्विकारान्कार्याणि भगवान्विसृजति किंदेहस्वीकारेणेति भावः। सिद्धान्ती दूषयति नो

नूनः संकल्पमात्राद्धि सृजति भगवानंकुरादीन्विकारान्नो संकल्पो मनोमूर्तेर्भव
ति भगवतो निःशरीरेन्द्रियत्वात् कार्यत्वादस्य कर्तृद्धि तत्प्रयत्नपक्षे देहवत्त्वाद्यवा
न्नैकः कर्त्ता नित्यदेहो न हि नियमगिरा पाद्यते विश्वरेकः ४०

इति भगवतो मनोमूर्त्तेनो तस्मात्संकल्पो न संभवति संकल्पविकल्पयोर्मनोधर्मत्वात् ईशे च तदङ्गीका
रात् हेतुमाह भगवतो निःशरीरेन्द्रियत्वात् अशरीरेन्द्रियस्य तु सोमनस्कः संकल्पोत्पत्तेः। मनो विना चेत्संक

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ध्यात्मानिरस्तं हि मुमुक्षूणामपि संकल्पोत्पत्त्या पुनर्जन्मवार्णि आपत्तिः प्रसंगः। ईश्वरेच्छाप्राणोऽस्मनाः श्रुतम्रुइ
त्यादिश्रुतेः प्राणमनसोर्निषेधश्रवणात्। किं चानवमते कार्यमात्रस्य हि कर्तृकत्वादस्य विश्वस्य कार्य
त्वाद्देहवत्कर्तृद्वित यमस्तु पते दिति चेन्न लाघवादेकः कर्तेति चेन्न लाघवस्य स्वतोऽप्रमाणत्वाद्दृष्टांता
भावात्प्रमाणाभावाच्चानेककर्तृकत्वप्रत्यक्षत्वाच्चेत्याह नहीति। हि यस्मादेवं तस्मान्नस्यैकत्वे वेदवाक्यं प्रमाण
माह नित्येति। एको विभुः से त्रिभिर्विशेषैः समस्तात्मनि त्यानां विद्या पृथिवी जनयन् देव एक एकोऽद्वितीयस्तव
नानि विश्वे त्यादि नित्यानामनित्यानां विश्व कर्तृकोऽपि तु गुणापादयन इत्यर्थः। सकलीशगुरूक्तनित्यानित्यदेहस्थं विनावि
श्वस्य दृष्टाद्योगादि इति निवेदितमयस्थान ४०

श्रीकृष्णाय परब्रह्मणे नमः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पक्षधर्मताबलाद्भवति नित्यज्ञानादिमानीश्वरः सिध्यतीति यदुक्तं तद्दूषयति । नित्यज्ञानादिमत्त्वमिति सगुणतो नित्यज्ञाना
दिगुणवत्त्वेन खलु घटेत कर्ता निर्गुणत्वाद्धेतोः साक्षी चेता केवलो निर्गुणश्चेति श्रुतेः ज्ञानप्रतिपादकश्रुतिस्मृतिवि
रोधाच्च । एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव प्रज्ञानं ब्रह्मेति श्रुतेः ज्ञानं विशुद्धं विमलं विशोक

नित्यज्ञानादिमत्त्वं न खलु सगुणतो निर्गुणत्वाद्घटेत ज्ञानादेर्जन्यतायां कलशवद्
जगतः पक्षसिद्धिः प्रसिद्धा । जन्यत्वं तस्य न स्यादपि च सगुणतो निःशरीरेन्द्रियत्वात्
पक्षाभावश्च न स्यात् प्रविलयसमयपायादीशस्य सिद्धिः ॥ ५२

मशोकमलोपमादिनिरस्तसंगम् । एकं सदेवं परमं परेशं समस्तवेदैर्न यतोऽभ्युदस्तीति स्मृतेश्च । नित्यज्ञानादिमत्त्वं परमात्मनोऽङ्ग
ङ्गीकृत्याह न तु नित्यज्ञानादिमत्त्वमनेन विश्वकर्तृत्वानुपपत्तिरिति चेन्न स्यात् ज्ञानादेर्जन्यतायामिति ज्ञानचिकीर्षाकृती
नां जन्यतायां सत्यां कुलालकर्तृककलशवज्जगतः पक्षस्य सिद्धिः प्रसिद्धा स्यादिति शेषः । नन्वनित्यत्वे बाधादिति वाच्यं न स्यच्च

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कुलालज्ञानादितुल्यत्वेन विश्वकर्तृत्वोपपत्तेर्धर्माधर्माभावात् जन्यज्ञानादिमत्वाप्तेः अत्यक्तासिद्धत्वान्नाहक्
ल्पनायां गौरवापत्तेश्च किंच जन्यज्ञानादिमत्वमपीशस्य न सिध्येत् कुतो नित्यज्ञानादेः असिद्धिरित्याह जन्य
त्वमिति तस्य ज्ञानादेर्जन्यत्वमपि न संभवतो निःशरीरेंद्रियत्वाद्धेतोर्न स्यात् कुतो नित्यत्वं किंच पक्षधर्मताब
लान्नित्यज्ञानादिमानीश्वरः सिध्यतीत्यत्र दूषणांतरमाह पक्षाभावाच्चेति अविलंबसमयाहूंद्वमहाप्रल
यकालानंतरं विश्वपक्षाभावादीशस्यासिद्धिरपि न स्यात् दृष्टार्थे चकारोद्देश्यः। किंच विश्वविसर्गे च कालाका
शादिसंतानांतिमिन्नानां ज्ञानाभावात् प्रलये च सर्वाभावादीशस्य सर्वज्ञत्वापि न सिध्यतीत्यलमतिप्रसंगेन। ए
वं वैशेषिकाणामपीश्वरवादे समानतंत्रत्वेन मतं निराकार्यमिति बोद्धव्यं ४२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा·श·
५२

तार्किकमतं निराकृत्य सेश्वरसांख्यमतं दूषयितुमभिदधाति। एवमिति पातंजलास्तेषु सिद्धायोगशास्त्रप्रणेता रो निगदितनयतः पूर्वोक्तसांख्यदूषणव्याख्यातसूरिभिः शिक्षणीयाः। न त्वयुक्तिमाहा नो दृश्यमिति। दृश्यं दृ

एवं पातंजलास्ते निगदितनयतः सूरिभिः शिक्षणीया नो दृश्यं पूर्वमुक्तं प्रकृत्र
जडतया स्रष्टुमेतन्न समर्थं संयोगाद्दृग्दृशोरिव नु च समविहितानित्यसृष्टिप्र
संगान्निःसंगो निःशरीरः क्वचिदपि न जगत्स्रष्टुमीष्टे परेशः ५२

यानं स्वतंत्रं प्रकृतेर्जडतयाचेतनत्वात्तद्विसृष्टुं स्रष्टुं नो समर्थं इत्यन्वयः। ननु चेतनत्वेन संयोगाद्दृग्दृशोरि व दृश्यं विसृष्टुं समर्थं भवितेति चेन्न चेतनयोर्दृश्यपुंसोर्नित्यसंयोगान्नित्यसृष्टिप्रसंगादित्यर्थः। ननु ईश्वरो विसृष्टुं शक्ष्यतीति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वेन्नग्राहकनिःसंगाद्युक्तिश्च संगोऽस्मदीयं तु न घटत इति क्षते ईश्येन सह संसर्गाभावान्नार्किककल्पितद्यक्षाशरीरवत्क
र्तृकत्वदर्शनान्निःशरीरः परमेश्वरः कश्चिदपि न जगतः स्रष्टुमीष्टे समर्थ इत्यर्थः। तस्माद्विश्वसर्गस्नेहान्नशरी
रः परमेश्वरोऽङ्गीकर्तव्यस्तथा च श्रुतिर्वाधान्नित्यशरीरः परेशः कृत्यसम्मतमवशिष्यत इति भावः। श्रुती
श्वराणां तु प्रभुत्वरं तु मे रहु रहस्यवचशादीश्वरनिंदया कल्पकोटिपर्यंतं तु रौरवनरकान्तरनिपातो नितीय नरएव।
।यएतां तु नर्षं शास्त्रात्मनम मतमीश्वरं नमनं त्यवज्ञानं तिस्थान च ष्टाः प्रतन्त्यव इति स्मृतेः ५२ ☼
इति श्रीराघवेन्द्रसरस्वतीविरचितायां मानसनसिद्धान्तशतकटीकायां सिद्धान्तकल्पवल्ल्यां नित्यविग्रहवि
चारो नाम द्वितीयस्तबकः॥ ॥☼॥ ॥श्रीमद्वृन्दावनचन्द्रो जयति॥ ॥☼॥ ॥

42

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भा·श·
४२

नन्वेकोऽसौ परमेश्वरो यं गोविंदमाधवस्तनेत्यत्राशंक्याह। पूर्वमिति। पूर्वं विश्वसृष्टेः प्राक् य ईशो विश्वसर्गार्थं नाभि
पद्मात् शतधृतिं ब्रह्माणं ससर्ज। तस्मै ब्रह्मणे च वेदानां चतुर्णामृग्यजुःसामाथर्वणामुपदेशान् कृतवा
न्। किमर्थं तत्राह। तनुमतां कर्मणे स्वर्गादिफलार्थकर्मानुष्ठानाय शर्मणे च मोक्षाय। कर्मानुष्ठानद्वारा ज्ञा

पूर्वं यो नाभिपद्माच्छतधृतिमसृजद्विश्वसर्गार्थमीशस्तस्मै वेदोपदेशान्कृतवान्
तनुमतां कर्मणे शर्मणे च यो विष्णुः पाति यश्च त्रियमयति तरामादिनारायणोऽ
सौ वोऽव्याद्यादवास्तुदेवो मम दशिमचतुर्व्यूहलीलावतारः ४२

नोत्पत्त्या मोक्षप्राप्तय इत्यर्थः। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रका
शं मुमुक्षुर्वै शरणमहं प्रपद्य इति श्रुतेः। यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः। नाभिह्रदाम्बुजादासीद्ब्रह्मा

राम·
४२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विष्णुसहस्रं वदति शिति स्मृतेश्च । किं च यः स्वयं विश्वं पाति पालयति शाश्वततुतः तुतः स्वैरनंतरं विष्णुमंत
र्यामितयानियमयति वा । यः सर्वाणि भूतानि स्वं तरो यमयतीति श्रुतेः । सो ऽसौ विष्णुः स्यादिति नारायणो वासु
देवो वसुदेवनंदनो मम हृषिकेशायनो वो मूर्त्याद्तिशायेन हृदयगोचरो भवेदिति भावः । नाराश्चापो ऽस्यायनं आ
श्रयो यस्य सः । आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तेन ताः पूर्वं तेन नारायणः स्मृत इति । यद्वा
नारं जीवसमूहो ऽयनमाश्रयो यस्य । नारस्य जीवसमूहस्यायनं प्रवृत्तिर्यस्मादिति वा । अथवा नारमयने
जानातीति नारायण इत्यर्थः । नारायणस्त्वं नहि सर्वदेहिनामात्मास्यधीशाखिललोकसाक्षी । नारायणो
ऽङ्गं नरभूजलायनात् तच्चापि सत्यं न तवैव मायेति । अङ्गं मूर्तिः । सा च द्वितीयस्कंधे दर्शिता वैराजरूपाना

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्ववास्मीत्यस्पष्टसहस्रंपरिवत्सरान्।तेननारायणेनाभयदापःपुरुषोद्भवाः।प्रकीर्त्तिश्चचत्वारोस्यहावि
भागास्त्रंशावासुदेवसंकर्षणप्रद्युम्नानिरुद्धाख्यालीलावतारायम्यसः।एकमेवाद्वयंब्रह्ममायायाचचतुष्टय
मिपतिस्मृतेः।नमोभगवतेतुभ्यंवासुदेवायधीमहि।प्रद्युम्नायानिरुद्धायनमःसंकर्षणायचेतिस्मृतेः।
नतुपांचरात्रास्मश्रीवासुदेवात्संकर्षणप्रद्युम्नानिरुद्धाख्यास्तुयोजीवाजायंतइतिमन्यंतेकुतस्तेषामी
श्वरावतारत्वमितिचेन्नजीवानामसतांब्रह्मत्वाद्युत्पत्तिर्नप्रकाशीजीवोपाधिजन्मनालोकेपिकंसत्वोच्यते
नतुवास्तवं।कृतनाशाकृताभ्यागमप्रसंगादेवमहाननर्थःस्यात्सानंतामतेम्रियतेवाविपश्चिदित्यादिश्रु
तिविरोधाच्च।उत्पत्त्यसंभवाच्चेतिन्यायविरोधाच्च

श्रीकृष्णायपरब्रह्मणेनमः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नकेवलंश्रीकृष्णस्यचतुर्व्यूहलीलावताराश्चापितुमत्स्याद्यानन्तैश्चावताराइत्याह।यस्यमत्स्याद्यालीला
वताराजगदवनकृतेजगत्पालनायप्रादुरासुः।प्रादुर्बभूवुः।सकृष्णोऽवतारीनंदगोपस्यगृहेविहारीस
जीयात्सर्वोत्कर्षेणवर्त्ततइत्यन्वयः।तान्विशिनष्टि।ज्ञानंनित्यज्ञानमाकारोयेषांतेनित्यंविज्ञानमा

मत्स्याद्याःप्रादुरासञ्जगदवनकृतेयस्यलीलावताराज्ञानाकाराश्चपाराः
श्रमबलनिधेर्लोकविस्तारनाथाः विश्वाधाराउदाराद्दुरितनमहराःसर्व
संसारसाराजीयात्कृष्णोऽवतारीरविदुहितृतटेनंदगेहेविहारी ४४

नंदमितिनिरुक्तेःअतएवअपारान्नविद्यतेपारमंतोयेषांतेपरमश्रेयोजनमाह।श्रमबलनिधेःसंसारसागरा
च्चकामाल्लोकानांविस्तारंसमूहंतारयंतीतितथातेनात्रहेतुर्यतोविश्वाश्रयाःअतएवउदाराभोगापवर्गयोर्दा

44

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नारः।उदारोदात्तमहत्तोरित्यमरः।कृपयास्मरणमात्रेणसर्वेषांदुरितंसर्वानहरतीतितथाते।एतेभ्योहेतु
भ्यःसंसारस्यसारभूताइत्यर्थः।ननुश्रीकृष्णःकथमवतारीनारायणस्यैवावतारित्वश्रवणात्।एतन्नाना
वताराणांनिदानंबीजमव्ययं।यस्यांशांशेनसृज्यंतेदेवतिर्यङ्नरादयइतिचेत्सत्यंसएवभगवान्नारायण
:श्रीकृष्णः।तथाचएतेचांशकलाःपुंसःकृष्णस्तुभगवान्स्वयमितिस्मृतेः।भगवान्नारायणएवस्वयंश्री
कृष्णस्याविष्कृतपरशक्तित्वादित्यर्थः।एषवैभगवान्साक्षादाद्योनारायणःपुमान्।मोहयन्माययालोकं
गूढश्चरतिवृष्णिषुइतिभीष्मोक्तेश्च।ननुपूर्वंदेवकांदेवरूपिण्यांविष्णुःसर्वगुहाशयइत्यनेनविष्णुरेवकृ
ष्णरूपस्तत्कथमधुनानारायणःकृष्णइतिकथमितिचेन्नतेषांदेवानांत्रिधःकथमेकएवभगवान्नारायणविष्णु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कृष्णवासुदेवब्रह्मपरमात्मपरमेश्वरादिशब्दैरभिधीयते। शुद्धसंवेदनं स्वतंत्रं शिवं विष्ण्वात्मकं रामब्रह्म
परमात्मादिनामभिरभिधीयत इति वाल्मीकोक्तेः। वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं। ब्रह्मेति परमा
त्मेति भगवानिति शब्द्यत इति स्मृतेः। विष्णुर्नारायणः कृष्णः स्वयमसौ केशवः शब्द्यते ब्रह्मत्रिनिमित्तभेदे
पि वाच्यस्यैकत्वाददोषः। तस्मात्त्वपादिहैतुकाः कर्मदा वायज्ञानज्ञाप्यपथैकत्ववदंतः। द्वंद्वक्रीडानिर्मितांशे
षड्विंशद्विंशतिस्तुतिभेदं किल यंमतस्त्वेति इति निक्षिप्य चोद्योक्तेर्भजनीयेश्वरनिर्णयः। ननु कृष्णस्य विष्णोरंशावता
रत्वं श्रूयते कथमवतारीत्वमुच्यते तथा च भागवते वैष्णवयोः। तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंसतः। अंशा
वतारं शुक्लकेशात्तमस्यश्रुत्यादि मध्यं तमस्तस्य विष्णोरित्यादिमत्यंतस्यार्थापरिज्ञानात्। अंशेन बलभद्रेण समम
वतीर्णस्यायद्वांशानामवताराणामितः प्रभुरवतारी चासाववतीर्णश्चेति तस्यायमर्थः। विष्णोरंशेन बलेन

45

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शेषं तानानंतं कल्पतरूणामुद्यानानि उपवनानि येषु तादृशानि यानि चिंतामणिमयसदनानि तेषां कोटीनै
फनिर्मितैर्विग्रहैर्मानैर्विशेषेण समासमानेष्वतः कीदृशे अनंतलोकत्रयाणां ध्वांतस्यांधकारस्य दीपे नाशके तन
द्रुकं नारायणो यो क्षीरोदध्येर्थ उत्तरतो हि द्वीपः श्वेतः सनाम्नाऽवस्थितो विशालः । मेरोः सहस्रैः सहितो यस्तनानां
द्वात्रिंशतो द्वेकविंशतिर्निमकरूतिनदा वैष्णवनारायणयोः । नदागतु नगद्यामः क्षीरार्णवस्तरस्तुत्र संज्ञाम
सप्तिनयनक्षीरतीरपयोनिधेः । क्षीरोदं मेधियं धामश्वेतद्वीपं चमत्कारमितिना केचिद्वित्रोतः श्वेतद्वीपं गोलोकं
कल्पयंतो मनसे श्वेतद्वीपं तत्पमिह गोलोकमिति कल्पितं वाक्यमुत्रावहं नितन्न प्रमाणमावाश्वेतद्वीपः क्षी
राब्धितीरे गोलोको देवलोकोपरिष्टात्तयोः संबंधानुद्धृत्य दानवृषभवरप्रदानवाक्यात्रयाणामपिलो
कानामुपरिष्टान्निवस्त्वमसि मम त्वमादास्थविष्णोतो गोलोकः संगविष्टनीति ५५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रीनारायणं विशिनष्टि निश्रत्समूहमिति निखिलदिविषदां ब्रह्मादीनां देवानां समूहैस्तथा पार्षदानां
सुनंदनंदादीनां मुनीनां सनकसनंदनसनत्कुमारादीनां ऋषिपिएषां समूहैर्निविष्टं यथा भवति तथा सम्य

निष्प्रसमूहं समूहैर्विलसदिविषदां पार्षदानां मुनीनां चैषां संसेव्यमानो विम
लकमलयोपास्यमानः समानः सन्न्दुडेकावरागात्सुरवरवनिताकोटिभि
र्गीयमानः सोऽसौ विश्वाधिपालः स्फुरति मधुभिद्देवकीगर्भबालः ॥ ४८ ॥

गनुरागसमाहितैः सेव्यमानः स कीदृक् विमलकमलया श्रिया भक्तैकसद्वैकेणौकहेतनयोऽनुरागः प्रेमातस्मा
त्करणाभरेणोपास्यमानः पुनः कीदृक् सुरवरवनिताभिः श्रीमद्गीतिभिर्गीयमानः यद्वा सन्न्दुडेकावरागादि

46

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ति सर्वत्वमेवं वद्यते। सोऽयमिति। धीमद्भिर्ध्यानादपरोक्षनिर्देशः। यस्मात्कारादपरोक्षाद्दृष्टेति क्रतेः। पुनः क्षी
रदकुक्षिमध्यिकं यथा स्यात्तथा पालयतीति तथेत्यर्थः। तथोक्तं नारायणीये। क्षीरोदधेरुत्तरतः श्वेतद्वीपो
महाप्रभः। तत्र नारायणपरा मानवाश्चंद्रवर्चसः। एकांतभावोपगतास्ते भक्ताः पुरुषोत्तमं। तं सहस्रार्चि
षं देवं प्रविशंति सनातनं। अनिंद्रिया अनाहारा अनिष्पन्नाः सुगंधिनः। एकांतिनस्ते पुरुषाः श्वेतद्वीपनि
वासिन इति। प्रवेक्ष्यंतीत्यर्थः। भविष्यत्सामीप्ये वर्त्तमानप्रयोगात्। अनाहारा विषयाहरणशून्याः। अ
निंद्रिया आहंकारिकेंद्रियरहिताः शुद्धसात्विकेंद्रिया इत्यर्थः ४८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पूर्वपद्यगतगोविंदनामार्थमाह श्रीवराहावतारइति। तथाभूतः सन्घोरसागरमानलग्नामविंददलभत ततो गोविंद इत्यर्थः तदुक्तं मोक्षधर्मे नष्टां वै धरणीं पूर्वमविंदं वै गुहाशयां। गोविंद इति तेनाहं देवैर्वाग्भिरभिष्टुत इति। गोभिर्वाणीभिर्वेदलक्षण भिर्विंद्यते यः सः। तदुक्तं गोभिरेव यतो वेद्यो गोविंदः समुदाहृत इति। गवां गोकुलपशूनामिंद्रतां गोवर्द्धनोद्धरणेन गवां पालना

श्रीवाराहावतारः प्रलयपयसि मग्नां योऽरसां यामविंदद्गोभिर्वा विद्यते यः प्रभवति च गवामिंद्रतायां गतो यः। गोविंदस्तेन सद्भिर्जगति समस्तुदितो मौलिबर्हप्रवालोत्तंसाशिखं समेदात्सम विनम्रशमितभ्रांतगोपालबालः ४१

दिंद्रस्तदभिख्यामभिषेकानंतरं गोविंदस्तेन समभ्युदित इत्यर्थः। तदुक्तं हरिवंशे। अहं किलेंद्रो देवानां त्वं गवामिंद्रतां गतः। गोविंद इति लोकास्त्वां स्तोष्यंति भुवि शाश्वतमिति। सकीदृक् मौलौ बर्हैः सह प्रवालोत्तंसपल्लवो यस्य सः। तां कथामाह तं मारीति। उमारेरिंद्रस्य गोवर्द्धनोद्धारेण समभेदादहंकारभंगाद्विताराक्रांताः स्वरमितस्मृहागोपास्तेषां बालाश्च येन सः ४२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पद्यक्रमागतं हृंदावनत्तुवीतियङ्क्षंमा हृंदावत्तमूः । क्रामेत्याह । श्रीमद्भट्टारविंदेति । ब्रह्मांडस्थोपरिकंईति
त्यायोवैकुंठलोकस्तस्मिन्स्फुरति भासमानेमति हृंदावलमीनमध्यानारण्यं अत्रयतिसर्वोत्कर्षेणवर्ततेइतिसंबं
धः । नित्यत्वेहेतुः - स्फुरद्घनइति । ज्ञानघनज्ञान्नित्यइत्यर्थः । तत्रापिहेतुः शोकइति । नविद्यतेशोकः विद्यायस्मिन् तत्र

श्रीमद्भट्टारविंदस्फुरितसरलिकानादकंदर्पभेदो गोविंदो गोपवृंदैर्व्रजकुलमहिलानंददोयत्र रेमे । ब्रह्मां
डोपर्यंशोकेस्फुरति चितिघनेनित्यवैकुंठलोके हृंदारण्यंवरेण्यं प्रजयतिजगतां धन्यमन्याग्रगण्यं ॥ ४८ ॥

नरतिशोकपात्मविक्षितिस्कृतेः । अविद्याभावेनतत्कल्पितत्वाभावात्तु नित्यइतिभावः । तदुक्तं नयत्रमाया किमुतापर
रेहरेरनुव्रतायत्र सुरासुरार्चिताइति । वैकुंठो नित्यश्चिद्घनत्वात् [illegible] नुमानात् [illegible] नित्यइत्यवगम्यते । तथा
च बृहद्वामनपुराणेऽभ्युच्यते । प्राकृते [illegible] लये [illegible] सत्त्वेः [illegible] गतेष्वपि । [illegible] ब्रह्म [illegible] चिन्मात्रे कालमायानिरोधः [illegible] ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ब्रह्मानंदमयो लोको व्यापि वैकुंठसंज्ञकः। निर्गुणो ऽनाद्यनंतश्च वर्त्तते केवलो ऽक्षरे। श्रीभागवते च॥ तस्मै
स्वलोकं भगवान्सभाजितः संदर्शयामास परं न यत्परं। व्यपेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भिः पुरुषै
रभिष्टुतं॥ ततो वैकुंठस्य भगवद्धाम्नस्त्वं नमसः परं। ज्ञानपत्रं च वैकुंठं हिरण्यधामाकंतोमयं। मूर्द्धभिः सत्यलोकस्य
ब्रह्मलोकः सनातनः इति लिङ्गपुराणे विशेषेणोपगताः संक्लेशाः पंचाशत्कोटियाः ऽस्मिन्नारायणाद्देषामिति वेशाः पानंत
लोकाः क्षिमोहो विभ्रमः साध्वसं संभ्रमस्तेन यस्मात्तं नित्यमित्यर्थः। तमसः प्रकृतेः परं नित्यं तत्स्वरं स्वप्रभं सर्वेषां
लोकानामुपरि तमानपद्मं स्तुतं स्वकृतोमयं नित्यं स्वलोको वैकुंठः सनातनो नित्यः। ननु वैकुंठः कल्पितो येन
लोकालोकतमस्कृतः। रमया प्रार्थमानेन देव्या तत्प्रियकाम्यये ति स्मृते वैकुंठस्य कल्पितत्वं श्रवणात्कतो नित्य

48

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वमिमिचेत्सत्यं स्वैरीदाहृतानां शाकानामेकवाक्यतया बहूनामनुग्रहो न्याय्य इति न्यायात्मनेकेकं कुलस्या
र्थ इति प्रसिद्धेश्चक्लिन्नपदस्य ग्राइर्मा विनार्थे व्याख्यायमानेन कंचन दोषं पश्यामः अन्यथा परस्परविरोधा
पत्तिरीर्ष्यानिवारेत्यर्थः । नक्रीडत्कृतरागतां वरेण्यं वरणीयं श्रेष्ठं किंच लोकानामपरगणनाईः स्रोताश्चच्छं मदीनमभि
त्यर्थः । धन्य हे हे रुचं ऋद्धं दारण्येगोविंदो गोपवृंदैः महद्गुणकुलमहिलानां रासलीलादिभिरानंददेरे मेचि
क्रीडाक्रीडत्कृष्णमद्भुतश्रविंदस्फुरिता शोभिता मुरलिकानस्यानादो निषादादिः स्वरग्रामस्तेनोद्घोषितः
कंदर्पस्तेन मंदोऽलसमद इत्यर्थः । तदुक्तं हृहृद्दामनो क्वचैतद्दर्शयामास स्वं लोकं तमसः परं केवलात्तमनदा नंद
मात्रमक्रूरमथ्यगांयत्र हृंदावनं नाम वनं तत्कामदुघैर्द्रुमैः । मनोहरनिकुंजाढ्यं सर्वर्तुसुखसंयुतमिति ४८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नकेवलं वैकुंठलोके वृंदावनमपि तद्यमुनासरिदपि वहतीत्याह ॥ यत्रेति ॥ असौ स्मरकन्याय तत्र वृंदाव
नेऽत्र वहति प्रकर्षेण भोगो भोगेन वल्लवयुवयः ॥ कीदृशी सरितां मध्ये पुण्येव वन्यातलसमूहाय स्याः साधुनः

यत्रासौ स्मरकन्ययेव वहति सरितां पुण्यवत्या शरण्या कृष्णा गीर्वाणमान्या निखि
लजनवन्दितांसन्मदाद्धे स्मरण्या । आरण्या गोपकन्या वसुरविलसनोरम्यला
वण्यपण्यामान्यामान्यास्मावदान्यां मम कलुषगणानीरयन्त्यावरेण्याः ४९

कीदृशी गीर्वाणानां मन्या पूज्या किं च निखिलजनवन्दितां प्राणिनां संसारसागरतरण्या तरणसाधनीभूता नौ
केत्यर्थः ॥ अतएव शरण्या लोकप्रतिपालनशीला ॥ अतो धन्यासर्वोत्तमा विशिष्टोपकारकत्वादित्यर्थः ॥ तद्

49

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मा॰श॰
५०

कं ईदृक्‌ हास्यमत्तुरगो। यत्र निर्मलपानीया कालिंदी सरितां वरा। रत्नबद्धोभयतटा हंसपद्मादिसंकुलेति।
।किंच यत्र वृंदावने गोपकन्या वसंति स्थिरयः। कीदृश्यः कैंशोरण्या वृंदारण्येभवाः। पुनः कीदृश्यः अखि
लस्य विश्वस्य मनोरमा लावण्यनिधयः। शांताः पण्यास्तथाश्वनाश्रिताः पणव्यवहारे स्तुतौ चेत्यस्माद्धा
तोः पण्य इति रूपं। ताः पुनर्मान्याः सर्वेषां पूज्याः। पुनः कीदृश्यः सकलगुणगौरव्यास्तां देवीनामश्रेण्या
गणनीयाश्रेष्ठाः अतः स्वभक्तेभ्यो वदान्याः समस्तपुरुषार्थदात्र्यः अतो वरेण्या वरणीया प्रार्थनीया इ
त्यर्थः॥ तत्रैवोक्तं॥ नानारासमदोन्मत्तं यत्र गोपीकदंबकम्‌। कैंतत्कदंबकमध्यस्थः किशोराकृति
रच्युत इति ४७ श्रीमद्वृंदावनविहारिणे श्रीकृष्णाय परब्रह्मणे नमः श्रीकृष्णः

रास॰
५०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यस्मिन् वृंदावने स गोवर्द्धनाद्रिरास्त इत्यन्वयः यमद्रौ नेत्रानंददहेत्रोः हस्तांभोजे करकमले गोकुलस्य रक्षिकुलस्य
परित्राणकर्त्ता मनुश्चशाकंमर्शकः इत्यायत्नं यथा स्यात्तथा हस्तं वानित्यर्थः कीदृशं धराणि धराणां शिखरे रत्नं शिरोमणिं
कदेत्याह मघवसंगे मघवा इंद्रः कोपात्कुलिशसमूहेन सह वर्षाणां प्रपाते समि कुलिंशवर्षाभिवारणायातपत्रं छत्रमिव

यस्मिन्गोवर्द्धनाद्रिर्धरणिधरशिरोरत्नमास्ते प्रयत्नं हस्तांभोजे धृते ज्ञो यमद्रौ
कुलिशघातवर्षाप्रपाते छत्राकं मघवदंभोगज्ञमरसिकुलत्राणकर्त्तातपत्रं ।
चित्रं मित्रं वधूनां नववनजलदवृन्दशाहृद्भं नंदपुत्रः ॥ ५० ॥

चित्रं यथा स्यात्तथा नत्रहेतुर्धीनो वधूनां मित्रं कमनीयतामाह नववनजलदवृन्दशितिा त्रिभंगी गरीशामाह वंशाह्व
गितिा उक्तं वा यत्र गोवर्द्धनो नाम स त्रिजरदरीभ्रतः रत्नधातुमयः श्रीमान् सुपक्षिगणसंकुल इति ॥ ५० ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मा॰श॰
५२

वृंदारण्ये पुनर्विशिनष्टि यस्मिन्नंदीश्वराद्या इति। यस्मिन्वृंदारण्ये नंदीश्वरबृहत्सानुप्रभृतयः क्षितिधरमणयः पर्वत श्रेष्ठाः संतीत्यन्वयः श्रेष्ठत्वे हेतुः सर्वेषां देवानां ब्रह्मादीनामभिवंद्या वंदनीयाः तत्र हेतुर्यतो नंदादीनां गोपानां निवास स्थलं तत्रापि हेतुर्नंदसूनोः स्मरणनलिनयोर्लक्ष्मभिर्ध्वजवज्रांकुशादिभिर्विद्योतमानाः पुनः कीदृशानि अमलानि

यस्मिन्नंदीश्वराद्याः क्षितिधरमणयः सर्वदेवाभिवंद्या नंदादीनां निवासस्थलममलसरोद्यानसंशोभमानाः
हंसारावाः सशाद्वाः प्रतिदिशमभितो वंद्रमंति स्म गावो भासंते नंदसूनोः स्मरणनलिनयोर्लक्ष्मविद्योतमानाः ५२

पुराणि पुष्पोद्यानानि च तैः संशोभमानाः यत्र वृंदारण्ये गावो वंद्रमंति पुनः पुनः ईमंति रंभंति ग्रसितं तृणाः कीदृश्यः
हंसारावा गोयाः संतानाः हंसारावं गोजातिशब्दं कुर्वाणाः सशाद्वाः सवत्साः ५२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पुनस्तत्कीदृक् फुल्लानां कल्पद्रुमाणां प्रबलो महान् परिमलस्तेनामोदितं वासितं आशानां दिशामंतरालं मध्यं यस्मिन् पुनः कीदृक् कालिंद्याः फुल्लेंदीवराणां स्तोमो येन तादृशो मेदुरमञ्जुलानां रोलंबानां मालासमूहो यस्मिन् तत् पुनः कीदृक् कोकिलानां कलरवनिकरैर्मञ्जुरस्फुटध्वनिसमूहैर्वाचालं मुखरं पुनः कीदृक् किसलयपु

फुल्लत्कल्पद्रुमाणां प्रबलपरिमलामोदिताशांतरालं कालिंदीफुल्लदिंदीवर
सुरभिमदोन्मत्तरोलंबमालम् वाचालं कोकिलानां कलरवनिकरैरुल्लसद्
पर्णशालं नानावल्लीमतल्लीकृतमधुमधुपाहूतमालिप्रवालम् ५२

ष्पफलादिभिरुल्लसंत्यः शोभमानाः पर्णशाला निकुंजमंदिराणि यस्मिन् तत् पुनः कीदृक् नानाजातीयानां वल्लीनां मतल्लीभ्यः प्रशस्ताभ्यः कृतानि गलितानि यानि मधूनि तत्संबंधिनो मधुपास्तैराहूताः कंपिता मतल्लीनां प्रवाला नवपल्लवा यस्मिंस्तदीदृशारण्यं जगतीति गतेन पूर्वेण पद्येन संबंधः ५२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा॰श॰
५२

वनस्थलिषु शिनष्टि। यत्र वृंदारण्ये कल्पानां कल्पद्रुमाणामारामाः उपवनानि समीपस्थागतानामर्थिनां कामान्सं
कल्पशीघ्रमतितरामतिशयेन विदधुः कृतवंत इत्यन्वयः। कीदृशाः तं उद्वदत्यरुणवर्णानि दलानि पर्णानि कुसु
त्मा च यथा भवानिति। न केवलं प्रियतमा एवमपि तु तेषां योगक्षेमं च भगवान्स्वयं ददाति रक्षतीत्याह द्वयः। कीदृशानां सक्ति-
मतामुत्तमानां श्रेष्ठानां परमभागवतानामित्यर्थः। तदुक्तं विष्णुतिलके यत्न पद्मसाक्षाद्धरिरेव सन्निहितो यथायोगमायया:
प्रेयांसः प्रेमसक्ता भगवतो ब्रह्मरुद्रेन्द्रादिभ्यस्ते सक्ताः सर्वास्तु समर्था न्तु निहितमनसो भक्तिमाजुत्तमानां
योगक्षेमं वहते तेषां विनश्चितकृपया सदा किंचनानासुदृशां च अनन्यमानसानां सम्पदि मध्वरिपुः सर्वथा सम्भवात्रिः १९
अथ परमभागवतानां प्रियपदः सम्भवति भागवतप्रधानत्वाकर्तृ। अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते तेषां नित्याभियुक्ता-
नां योगक्षेमं वहाम्यहं। उत्तमः कीदृशानामकिंचनानां न विद्यते भगवद्व्यतिरिक्तं किंचन आलंबनं येषां ते। उक्तं च। निष्किंचना मय्य-
नुरक्तचेतसः शान्ता महान्तोऽखिलजीववत्सला इति। किं च तावदत्यल्पमपि तेषां सम्पदाह्वः सम्पदि शीघ्रं सर्वथा सर्वप्रकारेण वैरा-
ग्यज्ञानादिना मध्वरिपुः स्वयमुद्धर्त्ता कीदृशानामनन्यदेवमनसां नैयतादृशानामेकान्तिनामित्यर्थः। तदुक्तं तेषामहं समुद्धर्त्ता मृत्युसंसार

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

74

ननु भक्तानां प्रारब्धकर्मादिक्षतिं केवलमतिज्ञानं विना कथं संसारादुद्धारः स्यादित्याशंक्य भगवद्भक्तेरद्भुत माहात्म्यमाह। तेषां पापानीति। तेषां भक्तानां भगवतो भक्तिः पापानि ब्रह्महत्यादीनि हरति नाशयति तानि की दृशानि कोटिजन्मभिरर्जितानि सुतपादितानि न तु केवलं भगवत्या। यथाग्निः तृणसमूहं दाहैः करोत्येषां भस्मसात्। तथा

तेषां पापानि भक्तिर्हरति भगवतः कोटिजन्मार्जितानि प्रारब्धानीह कर्माण्य-
पि दहति तरामग्निवत्तूलराशिं देहेऽहंतां निहन्ति द्रुतमपि ममतां सर्वथाऽत्मा
त्मनीयं किं वा वीशं स्वतंत्रं च मननमपि विचित्रं भक्तं करोति ८०

तद्विषया भक्तिस्तद्वैनां निकृष्टमनाः। तथा हरिभक्तिसुधोदये। कर्मराशिरनंतोऽपि सर्वजन्मार्जितः क्षणात्। भगवद्भक्ति वह्निशिखया दह्यते तूलराशिवत्। न केवलं पापानि हरति अपि तु प्रारब्धानि कर्माण्यपि छिनत्तीत्याह। प्रारब्धक र्मादीति। तदुक्तं हरिभक्तिसुधोदये। स्वयं च विष्णुर्हि ... यद्दर्वन्तरादकर्माण्येति द्रुतरात्। अवश्यभोग्यानि सुमास्त्र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मानितान्यन्निमङ्क्लिरितिहिसेंद्राः। तथा तत्रैव लक्ष्मीवशीकरणचूर्णमहोदराणि वत्यादवं कत्तरजं। सिचिरं नयंति
यानि शरणमसिलितानि च्छ्रणां लला टेत्रुवं तिदेवलि च्छिन्नानि डरकूराणीति। तिः वशे वदाहे हृष्टां तस्त्र लराशि सिवे
ति। किं च संसारः वंधहेतुश्च नात्मसिद्देहे स्वहं ताममते विवेकज्ञानद्वारा हंति। यस्मात्सङ्गमनिर्देहे उत्रविन्नेपणान्तरः
स्नेणः क्वपणेधी मूर्द्धो मसाहमिति च्युते। विवेकज्ञानं च स्वमानादहंकारो नात्मा मायया अन्यथा हृदयं वादवेतनं ज्ञास
घटकुड्यादिवत्। तथा देहाः नात्मा भौतिकत्वाद् घटवदित्यादेः सत्केरत्पद्भुतमहत्व माहकिंचेति स्वधीशमी स्वंरवत्तंत्रम
पि स्वमंवलाङ्कत्तं वं सकाधीनं करोतीत्यर्थः। तदुक्तं भगवता। अहं भक्तपराधीनो ह्यस्वतंत्र इव द्विज। साधुभिर्ग्रस्तहृ
दयो भक्तैर्भक्तजनप्रियः। नित्ययुक्तो ऽपि वश्यो ऽस्मि भक्तानामिति। श्ररज्जुभिः अजितो ऽपि जितो ऽहं तैरवशो ऽपि वशीकृतः। यस्मा
द्वद्धस्वहस्तेहास्रपियः कुरुतेरतिः। एवं तस्याऽस्मि स्वं मे न यन्त्रोऽस्माद्वयोः स्वइहिति ८०

रा॰ गी॰
७६

इदानीमभक्तानां निंदया मद्भक्तेर्दार्ढ्यं विदधाति पापिष्ठा इति। ये ये पापिष्ठाः पापीयांसो मद्भक्तिं दृढभक्तिं नो मन्यन्ते ते नि
रयवद्यमघोरयास्यंतीत्यन्वयः। नन्वभक्तं भगवन्मानमांद्ध्रुकृतिनोऽधमाः इत्यघं ते न गाढमाः। मायया पहृतज्ञाना आसुर
ंभावमाश्रिताः। येषां त्वन्तगतं पापं जनानां पुण्यकर्मणां। ते द्वंद्वमोहनिर्मुक्ता भजंते मां दृढव्रता इति भजनं पुण्यव

पापिष्ठाः कर्मनिष्ठा विपथपथरतकल्मषा नामे च्छापटिष्ठा मद्भक्तेः काष्ठां गरिष्ठां
कथमपि न विदुः आयशोभूमभूमाः। स्पष्टं निर्विकारं तमपि विलसनात्मानमीशं
स्वं हृदिस्थं ये येऽत्यजंति ते ते निरयवद्यमघोनामनंते स्वकं दम् ७२

संमगवत्कं तेऽकर्मेवानन्हेतुगर्भविशेषणमाह कर्मनिष्ठा इति। कर्मस्वनिष्ठा स्वर्गापूर्णमासादिषु निष्ठा येषां ते। अथ
मनित्यैर्यैः श्रीश्वरेश्वरवादिनामप्यनयेषां कर्मणामेवश्रुतामुनफलदातृत्वाद्धि कर्मपरं तत्रेश्वरमजनेनन्नवकर्मणाम

राम॰
७६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चेतनत्वेन फलदातृत्वासंभवान्नेरकः कश्चिदीश्वरोऽङ्गीकर्तव्य इति वाच्यं अपौरुषेयागमस्य स्वतः प्रामाण्या
त्तद्विहितकर्मणां फलदातृत्वसंभवात्। किंच परमेश्वरस्याश्वाद च कर्मफलदातृत्वे वैषम्यप्रसंगात्। तस्माल्लाघवा
त्कर्मैव फलदात्रस्तु। नैष दोषः। एष उ एव साधु कर्म कारयति यमूर्ध्वमुन्निनीषति। एष उ एवासाधु कर्म कारय
ति यमधो निनीषते। अज्ञो जंतुरनीशोऽयमात्मनः सुखदुःखयोः। ईश्वरः प्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा। फल
मत उपपत्तेः। स तया श्रद्धया युक्तस्तस्याराधनमीहते। लभते च ततः कामान्मयैव विहितान्हि तान्। इत्यादिश्रुति
स्मृतिभिरीश्वरस्यैव कर्मफलदातृत्वश्रवणात्। यद्वोक्तमीश्वरस्याश्वाद च कर्मफलदातृत्वे वैषम्यदोषप्रसंगादिति
तन्न। जीवानां कर्मानुरूपफलदातृत्वेन नेश्वरस्य वैषम्यप्रसंगः। वैषम्यनैर्घृण्ये न सापेक्षत्वादिति न्यायात्। लाघव
स्य च शाहृत्वेन परित्यक्तत्वात्तस्मादीश्वर एव कर्मफलदातेत्यर्थः। तदुपपादयति। विषयसंबंधिसुखलेशभोगमेधायां

76

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भा॰ श॰
७७

वरिष्ठाः । एतद्गतमनत्तु परमेश्वरमनन्ते विषयस्त्वभोगलंपटा इत्यर्थः । अतो भगवद्भक्तैः कां कां दिशं कथमपि के-
नापि प्रकारेण न विदंतीति तथोक्तं भगवता । इष्ट्वेह देवता यज्ञैर्गत्वा रंस्यामहे दिवि । तस्यांत इह भूयास्म म-
हाशाला महाकुलाः । एवं पुष्पितया वाचा व्याक्षिप्तमनसां नृणां । मानिनां चातिस्तब्धानां मद्वार्तापि न रोचत इति ।
कीदृशा यज्ञानां मुख्यैः आयशो बाहुल्येन मन्त्राभ्रष्टवर्णास्त हृदिस्थं न तद्दूरस्थमखिलजगतामीश्वरं नियंतारं तत्रा-
पि स्वमात्मानं कथमपि न विदुः संतः । तदुक्तं भगवता । कामिनः कृपणा लुब्धाः पुष्पेषु फलबुद्धयः । अग्निमुग्धा
धूमतांताः स्वं लोकं न विदंति हि । न ते मामंग जानंति हृदिस्थं य इदं यतः । उक्थशस्त्रा ह्यसुतृपो यथा नीहारच-
क्षुष इति । तं कीदृशं । अखिलजगतां स्रष्टारं तथाहि विकृतिं वारयति निर्विकारमिति । तदमनतो अश्रद्धः पातोपि

राम॰
७७

श्रूयते । तदुक्तं । य एषां पुरुषं साक्षादात्मप्रभवमीश्वरं । न भजंत्यवजानंति स्थानाद्भ्रष्टाः पतंत्यध इति ८२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पूर्वोक्तनिर्गुणोपासनेनैराग्यस्याभिमुक्तिफलकमाह। जीवात्मानमिति। विमुक्तसर्गात्पूर्वमेकमेव परमात्मानमनाद्य
विद्यया विवर्तितविविधवैचित्र्याकृतमभिन्नं भिन्नमिव भासमानमसंसारिणं संसारिणमिव प्रतीयमानं जीवात्मानं वेपदा
र्थं शरीरादिंद्रियेभ्यः शब्दादिविषयेभ्यश्च विविच्य पृथक्कृत्य संसारवासनापाशान्दहतीति सर्वत्र संबध्यते तत्पदार्थेन

जीवात्मानं शरीरेंद्रियविषयवयात्स्वं पदार्थं विविच्य छित्वा संसारपाशान्दहतु तदभिदाः संगृणन्नाप्य सद्यः
दग्ध्वाविद्यां सकार्यामनलमगवदानंदसान्द्रस्वरूपं ज्ञानाकारं विमुक्तिं विशतनुतनुभृतां संक्षिरेषाप्तरोऽः ८२

परमात्मनाभेदं वदन्निति वाक्यवजहदजहत्स्वार्थयालक्षणयाऽभिदाऽभेदेन सकृत्संगं वैराग्यं न तत्संसारकारणम
विद्यां सकार्यामावरणविक्षेपकार्यसहितां तदुक्तं सिद्धान्तसोपाने॥ सदसद्भ्यामनिर्वाच्याविद्याविद्याप्रतीतिभिः स्व
मायासंहतेरायाविद्यावेद्यापरात्मन इति। अमलश्चासौ भगवदानंदश्चतेन सान्द्रोघनस्वरूपं यस्यास्तां ज्ञानंदाढसति य
दे।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ज्ञानादिनिष्क्रान्तेः सुखदुःखाभावयोरैक्यमर्थं ग्रांगीकारात्तात्त्वमस्यहं ब्रह्मास्मीति वेदवाजनितज्ञानमाकारो यस्या
स्तादृशीमतीत्वरारेरेषा निर्गुणोपासनाक्रियास्तु मूर्तानामाहृसक्तिमतां विशुद्धिं दशातिदद्दातीत्यत्तश्चयः न चैतमेव विदित्वाऽति
मृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्रुतेरात्मज्ञानस्यैव मुक्तेः साधनत्वाश्रवणात्कथं सक्त्याद्युक्तिरिति वाच्यं सगुण
सोऽहं ब्रह्मज्ञानाकाराहत्तिर्मुक्तिमार्गो वेतो ज्ञानस्वरूपत्वाद्ब्रह्माकार इत्तिवदेवोपपत्तेः न च निर्गुणज्ञानादेव मुक्तिर्न
सगुणज्ञानादितिवाच्यं सगुणनिर्गुणयोर्ज्ञानस्वरूपत्वेन भेदाभावात्स्त्रादिलीनत्वं कर्मणा एतासक्त्या माममभिजाना
तियावान्यश्चास्मि तत्वतः ततो मां तत्वतो ज्ञात्वा विशते तदनंतरमिति सक्त्यावतन्यया शक्यत्वहमेवंविधोऽर्जुन ज्ञा
तुं द्रष्टुं च तत्वेन प्रवेष्टुं च परंतपानसाधयति मां धर्मोनसांख्यं योगउद्धवानस्वाध्यायस्तपस्त्यागो यथा सक्तिर्ममोर्जि
तामत्क्याहमेकयाग्राह्यः श्रद्धयात्माप्रियः सतां सक्तिः पुनाति मन्निष्ठा श्वपाकानपि संभवादिति ८२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्वपंचे शरीरेंद्रियविषयवर्गयास्त्री वात्मानं विविच्य स्वस्फं तद्रूपं प्रदर्शयति । देहो नात्मेति । देहादीनामनात्मत्वमनु
मानेन साधयति । देहो नात्मा जन्यत्वाद्दृश्यत्वात्सावयवत्वात्परिच्छिन्नत्वाद्रूपवत्त्वात्स्वनित्यो भवति घटवत् । एवम
सुः प्राणः करणमिंद्रियमेषां मनः संघातो देहेंद्रियादिसमूहः । एतेषां कारणं मोहोऽज्ञानं । यथा योगं हेतूनामत्र

देहो नात्मा न चासुर्न च करणमदो नो मनो धीर्न वाहं नो संघातो न मोहः सदपि न च वेला यदृश्याद्विभुत्वात् ।
सांशत्वादस्थनित्यो भवति च घटवत्तादृशो नायमात्मा तस्माद्द्रष्टा निरंशो विभुरिति नियमस्तेन नेनं चक्रिजीवं ॥ ८३ ॥

योज्यः । शून्यवादिमतं निरस्यति । नासदिति । ननु सदेवात्मास्तु सुषुप्त्यादौ शून्योपलंभात् । असदेवाग्र आसीत्ततो वै
सदजायतेति श्रुत्या च सत्प्रतिपादनादिति चेन्न सुषुप्त्यादौ तज्ज्ञातृत्वसाक्षिणः स्वयंज्योतिरिति श्रुत्यात्मनोऽसत्तायाः व

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा·श·
७७

काशतयोः श्रुतिपादत्वात्। असदेवाग्र आसीदिति श्रुतिरसत्त्वस्य मिंद्रियागोचरत्वं न तु भावः कथमसतः सत्ताय
नइति श्रुतिषेधात् असन्नेव स भवति असद्ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद संतमेनं ततो विदुरिति श्रुत्यंतरेण
ब्रह्मणः सत्त्वश्रुतिपादनात्। आत्मा वस्तुः पार्थिवमिंद्रियाणि देवाः सर्वमोक्षं अतः लं कृताशः मनोऽप्रमातृं धिषणा च
सत्त्व सहंकृतिः रंध्रि क्रियार्थसाम्यमिति स्मृतेः। नहि परीतश्च जीवात्मेत्याह। ताहशो नाय मात्मेति तद्वैचक्ष्ये दर्श
यत्यज्ञन्माद्दष्टा निरंशो निरवयवो विभुरपरिच्छिन्न इति चेतनं नित्यं वनि गमो वक्षीत्युच्यः। अजो नित्यः शाश्वतो
ऽयं पुराणो नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति विज्ञाता निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनं। सर्वव्यापी सर्वभूतां
तरात्मा प्रज्ञानं ब्रह्म विज्ञातारमरे केन विजानीयान्नित्यं विज्ञानं सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेः। नित्यः सर्वगतः स्था
णुरचलोऽयं सनातन इति स्मृतेश्च ८३

राम·
७७

ननु जीवात्मा परमात्मनः भिन्नोऽभिन्नो वा यद्यभिन्नस्तदोपास्योपासकविरोधो भेदेनैवोपासनोपपत्तेः। यद्यभिन्नस्तर्हि
श्रुत्यभेदप्रतिपादकश्रुतिस्मृतिविरोधप्रसक्तिरिति चेत्त्वयांशं क्व्याहा जीवः इति जीवश्चेतनः कस्मात्तत्र ब्रह्मणोऽभिन्नस्ते
दात्मकस्तमसा ज्ञानेन पृथग्भिन्नात्मनेन वस्कनस्तथा। नद्यः क्षीरं न श्रेष्ठः ह्यनन्य पश्यंशाशिस्तु वनाद्यं ब्रह्मात्वयं परम

जीवः कस्माद्भिन्नः पृथग्भिन्नमस्मात्समवस्थानमतेः सोऽहं ब्रह्मांशोऽपि भासितस्य वदद्विहरिति नयात्वायमात्मा
ब्रह्माहं ब्रह्मवाचापि ब्रवीति गम्यगणः क्वापि वांशं परोशः कस्मादादीक्षमैवांशः इति वचसामाभिकोऽयभिन्नेदं ७४

नोऽनम्यगात्वबोधं व स्वात्मस्वीनिवृत्तापरिभेनाविशिष्टदेकं स पाणिकवलं परमेष्ठा चेष्टा श्रोहो मायमहोमायं तं दृगो
पद्मजौ कंसो यस्मिंश्च परमानन्दं पूर्णं ब्रह्म समनातनेभिति। नत्वहं ष्टान श्रामाम्य वनत्यनिर्विवदन्यथानलादौ चं ब्राह्मि
प्रतिविंबस्तथा ज्ञाने परमात्मनः प्रतिविंबो जीवः तत्वर्थः। एकधा बहुधा चैव दृश्यते जलचंद्रवदिति श्रुतेः। श्रामास

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

79

मा॰ श॰
८०

एवचा एकएव परोक्षात्मात्मेषात्मन्यवस्थितः। यथैकं द्रुतरूपात्रेषु भिन्नान्येकानेकानि चेति स्मृतेश्च। तस्य क्लेशाभि
न्नवे अप्रमाणमाह। इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते। एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः। क्षेत्रज्ञं चापि मां
विद्धि सर्वक्षेत्रेषु भारत इति गीतयाह हरिः। श्रीकृष्णोऽथ यद् दक्षिणाह। क्षेत्रज्ञं चापीति। न केवलं हरिरेव ददपि तु निग
मगणोऽयमात्मा ब्रह्माहं ब्रह्मास्मीति वाचाऽवदद् दिव्यस्तु यः। अस्त्रेनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि
अणमेहं ऽवङ्मावाश्चांडालगोखरा। ईश्वरो जीवकलया प्रविष्टो भगवानिती त्यादिश्रुतिस्मृतीभ्यः इष्टे। किंच कृ
क्वचिदपि च श्रुतिस्मृत्यादौ परस्य परमेश्वरस्यांशं जीवात्मानं कृष्णो ममैवांशो जीवलोके जीवभूतः सनातन इति च व
चसाऽवादीत् कवानित्यत्वयः। न तु क्वापि सिद्धांतमोपानो कश्चिदंशोपि जीवात्मा श्रूयते परमात्मनः। अविद्यको हरि
रंशो निरंश स्यन वा स्तव इति। अथवाऽस्तु वा चैतन्यांशोयं चेतनमात्रः प्रतिरूप क्षेत्रज्ञः संकल्पा [illegible] व मायामिन्ना

राम॰
८०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्या०म०
७०

नलिंगमिति श्रुतिः एकस्यैव समांशस्य जीवस्यापि महात्मनो बंधोस्याद्विद्ययानादिर्विद्यया च तथेतरः इति स्मृ
तिश्चांशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एक इति न्यायोपि द्रष्टव्यः। यद्वांश यद्यपि
भिन्नत्वदोषापत्त्या परमार्थविरोधो भेदेनैवोपासनोपपत्तेरिति नन्वमूमां श्वन्ने मायिकोपाधिभेदमिति। यद्यपि वास्तवो
भेदः द्वैतश्रुतिविरोधान्नोपपद्यते तथापि भगवन्मायाकल्पितदेहेंद्रियोपाधिभेदाद्घटाकाशवज्जीवपरमेश्वरयो
र्भेदेनोपासनार्थं क्वचिदपि श्रुत्वादिश्रुतिस्मृत्योः कश्चन विरोधो न भवेदित्यर्थः। न च तयोर्भेदाभेदसंबंधः स्वर्णकुंडल
वदिति वाच्यं स्वर्णकुंडलयोः कारणकार्यत्वेन कार्यस्य वाचारंभणमात्रत्वाद्भेदाभेदयोश्च विरोधः स्वत्वजीवात्मपर
मात्मनोरुपाधिभेदाद्भेदो न कार्यकारणत्वाभिवंधनस्तथात्वे जीवस्य कार्यत्वेन मिथ्यात्वाद्वाक्तिज्ञानोपदेशाद्यर्थः
स्यादविकृते परमात्मन्येकस्मिन्धर्मिणि भेदाभेदयोर्विरुद्धधर्मयोः परस्परविरोधाद्घटपटाभावयोरिव भेदाभेदयोर

८०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा.शा. ८१

नन्वेषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पंचधा संविवेशेति श्रुत्या आत्मनोऽणुत्वश्रवणात् अणुरिति केचि
त् मध्यमपरिमाण इति केचिदार्हताः । विभुपरिमाण इत्यास्तिकाः । तत्र किं परिमाण इत्यपेक्षायामाह । जीवात्मे
ति । एष जीवात्माऽणुर्न कश्चिदपि नवेत्तर्हि कथमेषोऽणुरात्मेत्यादिश्रूयते मत्यंत्र सूक्ष्मत्वात् मध्यापकोऽपि त्रि

जीवात्मा नाणुरेष क्वचिदपि च मतो व्यापको वा सूक्ष्मत्वान्मेधयाप्यद्वेरणु
वा ह्यपदिशन्ति तथोत्क्रान्तिगत्यागतिभ्यः । ब्रह्माभेदाद्विभुत्वं वदति निगम
वाक्योमनात्मध्यमत्वे सांशत्वादेरनित्यो भवति च विभुरेव प्रत्यगात्मा मुमुक्षोः ८५

योपाधेरणुत्वात् सूक्ष्मत्वाद्वेनाऽणुरिति श्रुतिर्व्यपदिशतीत्यर्थः । बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो
ह्यवरोऽपि दृष्ट इति श्रुतेः । तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवदिति न्यायाच्च । ननूत्क्रान्त्यादेर्गमनीयत्वव्यपदेशानि

रामः ८१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मः श्रुतेः । अनन्तत्वश्रुतेः साक्षात्त्वमहत्त्वादिश्रुतेश्च । तत्र हेतुमुक्त्वा नित्यत्वमाह नित्य इति । अन्यथा व्यापकत्वे शरीरा
न्तःक्रमणं मरणमिहलोकपरलोकयोर्गमनागमने च न स्युरित्यर्थः । तर्हि कथं व्यापकत्वमि[illegible] त्यत आह ब्रह्मणा सहाभेदा
त्तादात्म्याद्विभुत्वं मन्तव्यमात्मनस्त्वमामिस एष महानज आत्मेत्यादिश्रुतेः । इह हृद्वा हृद्गुहायामात्मा बुद्धौ निगीयते । नित्य
ः सर्वगतः स्थाणुरचलोऽयं सनातन इति स्मृतेः । तत्र दृष्टान्तोऽयं मनवदिति यथाकाशो व्यापको नित्यश्च तद्वदित्यर्थः
आकाशवत्सर्वगतश्च नित्य इति श्रुतेः । मध्यमपरिमाणत्वे दोषमाह मध्यमत्व इति सांशत्वादेहेतोः घटवदात्मावयवि
त्वादनित्यो भवतीति नित्यत्वे दूषणमाह । न विद्यत इत्यर्थः । उत्पद्यमानस्य तस्योत्पद्यमानत्वेन भवतीर्थः प्रत्यगात्माऽनि
त्यः सावयवत्वाद्दृश्यत्वाज्जन्यत्वात् अविभुत्वात् रूपवत्वात् शरीरवदित्यनुमानमुक्तमिति द्रष्टव्यं ८५

इदानीं जीवेशयोरभेदे मायोपाधिकभेदे च भगवन्नित्योपासनानुपपत्तिस्तद्वदैव तथा हि तयोरनादिकाभे
देऽनादेरप्यनुपाध्योपाधिकभेदस्याप्युपपत्तिः मायाकल्पितभेदस्य स्वप्नवन्मिथ्यात्वादुपासनायाश्च विलुप्ततरां तथा
चानित्योपासनानुपपत्तिरिति निरस्तानामेकेषां च शङ्कानामारब्धं चतुरत्र्यं श्लोकानुशासनारस्तयोर्भेदे प्रत्यक्षमनुमा

भेदेऽप्युक्तं प्रमाणं परमतनुभृतो शङ्करे केऽनुमानं शङ्कस्त्वद्वाद्यपर्णोऽद्भुतिरिति निगम
वचः पाञ्चरात्रागमास्तथान्ये ऽप्यर्थापत्तिश्च वस्थाश्च विरहितनयोपासनानामयोगा
न्नित्यत्वात्पार्षदानां भवति भगवतो नित्ययोगोपपत्तिः ८६

नेशद्वं चाङ्गिरिव्याह । भेदे प्रत्यक्षमिति । परमतनुभृतोः परमेश्वरजीवयोर्भेदे प्रत्यक्षं प्रत्यक्षं प्रमाणं वैकुण्ठश्वेतद्वीपनि
वासिनः पार्षदाः साक्षात्कुर्वन्ति भगवन्तमनुपासते तथा वृन्दावनद्वारकादिषु गोपा गोष्ठीयादवाः पाण्डवाश्च तं सेवन्ते

CC-0: Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नचनसंदृशे तिष्ठति रूपमस्य नचक्षुषा पश्यति कश्चनैनमिति श्रुत्या चक्षुरिंद्रियग्राह्यत्वप्रतिषेधादिति वाच्यंन
स्यानिरूपणत्वप्रतिषेधविषयत्वाच्च तस्य दृश्यत्वेन नश्वरत्वं वाच्यं न तथाहि हृदिस्थं यशक्तेर्मनसोनिःकालुष्याहृक
वेनमनसि दृष्टविषयत्वात्। तदुक्तं भगवतैव। मयाप्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात्। तेजोमयं वि
श्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वमिति। जीवात्मा परमात्मनः पृथगसर्वज्ञादसर्वशक्तिर्वा दसत्यकामसत्या
दसत्यसंकल्पश्चास्मदादिवद्दिश्यात् अस्तु परमात्मा। यः सर्वज्ञः परास्य शक्तिर्विविधैव श्रूयते सत्यकामः सत्यसंकल्प
इति श्रुतेः। द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाक
शीति। सुपर्णौ द्वौ सदृशौ सखायौ यद्यप्युपाकृतनौ जीवेश्वरौ एकस्तयोः स्वादुतिपिप्पलान्नमन्यो निरन्नोपि वले
नसूयात्। उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर इत्यादिस्मृतिश्चाह्

४२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चउमाणमाहशिव्यत्रयः नचतयोर्भेदो मायाकल्पितएकमेवाद्वितीयं नेह नानास्ति किंचनेत्याद्यद्वैतप्रतिपादक
श्रुतिविरोधादिति वाच्यं श्रुत्योर्विरोधे ऽधिकारिभेदेन व्यवस्थोपपत्तेः अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशि
नं गृह्णातीति षोडशिग्रहणाग्रहणवत्तायद्वा ऽसगुणसगुणज्ञेयध्येयब्रह्मविषयभेदाच्छ्रुत्योरविरोधः श्रुतिस्मृत्योरेतयोः
प्रकरणे मायाकल्पितताश्रवणाद्वस्तुपपत्तिरिति भावः तथाच्येयं चराचरात्मयोर्भेदे ऽर्थापत्तिः प्रमाणमाह तयोरभेदे
उपास्योपासकसंब[illegible]नुपपत्तेः विद्यादिव्यवस्थानां च विरहितत्वात् तथाहि तेनाभराबदुपासनानामयोगाद्
देवपार्षदानामुपासकानां नित्यत्वाद्भगवतो भक्तियोगउपपद्यत इत्यर्थः न चाविद्योपाधिभेदेनाविद्याकार्यभेदेन
वा सर्वाव्यवस्थोपपद्यत इति वाच्यं तथात्वे सत्त्ववत्सर्वासां व्यवस्थानां मिथ्यात्वात्प्रवृत्तेरयोगात्सकलं व्याकुलं नवेदि
तिद्दृष्टं न चाद्वैतापत्तिरिति वाच्यं मद्वैतश्रुतिविरोधस्तेनत्याभेदविवक्षया योजयितव्यत्वाविरोधः पार्षदानां च नित्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रुतस्तादृशाः भगवत्प्रेमसज्जनोत्कंठितमानसास्तु किं नाभिलषंतीत्याह केचिदिति । केचिन्महांतः साधवोऽतिविरलास्तु
किं भगवत्स्वरूपरूपां नित्यनिरतिशयानंदलक्षणां नेच्छंति न कामयंते । तत्र हेतुः मधुरिपोर्भजनानंदसंदोहेन पूर्णाः
पूर्णकामाः कीदृशास्त्वन्ये त्वं परत्वं यथा स्यात्तथा क्रमस्य गाथा लीलाकथाः श्रवणं वलात्कृत्य दिनं हरयंतः साधयं

केचिन्नेच्छंति मुक्तिं मधुरिपुभजनानंदसंदोहपूर्णास्त्वन्ये त्वं क्रमगाथाः श्रवणमनुदिनं हरयंतो महांतः । श्रा-
मारामास्तु कामं तुरमथनमस्ते नारदाद्याश्च ते ते तस्मात्तु केषु गेहे ऽप्यजनमधिकानंदमानंदनीयाः ८७

तः संतः । न तु कं भगवतात्मैकान्तं मनसः स्पृहयंति केचिन्मत्पादसेवाभिरता मदीहाः । येन्योन्यतो भागवताः प्रसज्य सभा-
जयंते मम पौरुषाणि । सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत दीयमानं न गृह्णंति विना मत्सेवनं जनाः । न पारमेष्ठ्यं
न महेंद्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यं । न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यदित्यादि । नात्यंतिकं वि-

83

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा·श्रा·
८४

गणयंत्यपि ते इमादं क्रिं वान्यद् विनमयं कृतउन्न यैस्ते । येंगत्त्वं दंष्ट्रिकारणाभवतः कथायाः कीर्त्त्यतीर्थयशसः कु
शलास्य स्नाइ ति मनकाघ्नकैः । ननु ते कि मिति ते ष्ठं नि तत्राह । आत्मारामाश्चेति स्वकीयभुक्तानारदाद्यानारदसेनके
मारस्तनंदाद्याः कामं यथेष्टं मुरमथनमं कुंभजंते यतः । तदुक्तं । आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे । कुर्वंत्यहै
तुकीं भक्तिमित्थंभूतगुणो हरिरिति । अस्मान्नु केनित्यानंदरूपायाः सकाशान्मुरारेर्भजनमधिकानंदमधिकं आनं
दोयस्मिन्नु ततु निंद्राख्यास्वादयः । अयं भावः । मुक्तानां भगवद्भेदे न नित्यानंदमधिगतानामपि भगवद्भजनानंदस्य
भेदे न प्रतिपानवदास्वाद्यास्वादकानुभवसिद्धत्वान्नदाधिक्यमुक्तमिति दृष्टं यं नवद्भजनानंदरूपायामुक्तेर्नित्यत्वाद्भ
जनानंदस्य मनोहन्निजत्वादनित्यत्वेन कथमाधिक्यमुच्यत इति चेत्सत्यं मनोहन्ने स्वदमिथ्यंज कथा दुत्तानंदाका
रांतःकरणहन्निवन्नजन्यत्वमपि तु हत्ते रेवतथात्वमिति भावः । तदुक्तं श्रीभागवते । यानिर्दृतिस्तनुभृतां तवपादपद्म

राम·
८४

ध्यानाङ्गवस्त्वनकथाश्रवणेन वाख्यात्। प्रोद्दामणिस्तु महिमन्यपि नाथमान्मे किं वं न कामिह्नुलिनात्मनतां विमाना
नानपरिलषंति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसंगविसृष्टगेहाः॥ येऽङ्गस्मान्नान्क्षिति सुतान्स्वजना
र्थदारान्स्रार्थान्श्रियं सुरवरैः सदयावलोकान्। नैच्छन्नृपस्तदुचितं महतां मधुद्विट्सेवानुरक्तमनसामभवोऽपि फ
ल्गुरिति॥ हरिभक्तिसुधोदये च प्रह्लादवाक्यं॥ नमस्ते करुणाङ्गाद् विशुद्धा सिद्धिरस्तु मे। सुरवानितोऽप्यदायं तेज्ञा
स्मात्ययि निरागहं शैवलद्वाक्यं॥ यथा हनाथः प्रह्लादं संकरत्वसिद्धिदं कृतां श्रहं नवाम्रदाने स्तुत्वं बहुत्यजे
मित्तु सीत्याह विवाक्यैर्भक्तनानंदस्य तु कोरथाधिकश्रवणादिति॥ न कामये नाथ तदप्यहं क्वचिन्न यत्र युष्म
च्चरणाम्बुजासवः। महत्तमान्तर्हृदयान्मुखच्युतो विधत्स्व कर्णायुतमेष मे वरः॥ भवान्प्रभुरहं दास इति यत्र विलुप्यते।
भववंशाद्विदे तस्मै स्पृहयामि न मुक्तये इति॥ भक्तिर्भगवतः सेवा भुक्तिः स्वपदलंघनमिति ८७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एतेनोक्तौ निर्दोमनाः केवलविद्वांसो भगवदुपासनानंदाभिज्ञाः प्रेमभक्तिं परमपुरुषार्थमाहुरित्याह विद्वांस इति। कीदृशाः प्रेमभक्तिनिष्ठायां विमला धीर्येषां ते न तु मनसः कुत्सानंदाकारायां वृत्तौ भक्तिलक्षणेन जन्यत्वात्कुतः पुरुषार्थत्व मिति चेत्तत्राह तस्याः प्रेमभक्तेः वृत्तिर्नित्यात्मिकानंतानंतीस वन्तिपुनरपि तत्त्वमित्यायातस्यास्तु मिथ्यात्विका आत्मसं विदि वद्ब्रह्मज्ञानवृत्तिवत्कुतस्तस्या नित्यत्वादेतान्मदाकारमनोवृत्तिनाशे प्राप्ते तत्स्थाने मनोवृत्तेरेवोत्पत्तिविनाशित्वात्।

विद्वांसः केचिदन्ये विदुरमलधियः प्रेमभक्तिं पुमर्थं तस्या नोत्पत्तिकेयं भवति पुनरपि ध्वंसिका चित्तवृत्तिः। नित्यत्वादात्मसंविद्वदियमपि मनोवृत्तिनाशेन नश्येन्नित्यप्रेमस्वरूपं वदति भगवतो वेदवाक्यं हि तस्य ८८

तत्कुतस्तत्राह नित्यप्रेमभगवतः स्वरूपं नित्यं विज्ञानमानंदमानंदं ब्रह्मणो रूपमानंदरूपेण तस्यानंदस्यैवान्यानीत्यादि वेदवाग्वदतीत्यर्थः ननु प्रेमभक्तेः पुरुषार्थत्वे किं प्रमाणमिति चेदस्ति शब्दार्थापत्तिः प्रमाणमिति ब्रूमहे मुक्तिं ददाति क र्हिचित्स्म न भक्तियोगं मोक्षश्रियः प्रियमदवीन भक्तिमद्य दानरीत्यादिश्रवणात् मुक्तिस्वरूपादप्यधिका भक्तिर्हि नान्यथा इ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पंस्वरूपेणाव्यवस्थितिरितिमुक्तेः। नित्यनिरतिशयानंदरूपं वा भगवान्षडैश्वर्यवान्मुक्तिं ददाति न कर्हिचित्कदाचित्स्म
निश्चितं भक्तियोगं प्रेमलक्षणं न ददातीत्यर्थः स्वतंत्रस्य भगवतो भक्तपराधीनत्वे स्वातंत्र्यभंगभयान्न हि स्वतंत्रः क्व
चित्पराधीनतामभिलषतीति भावः। तस्मान्मुक्तेरपि भक्तेर्दुर्लभत्वं श्रवणात्पुमर्थत्वमतिस्पष्टमेवेति गम्यते। किंच मोक्ष
प्रियः मोक्षलक्ष्म्याः प्रियसखी प्रेमभक्तिस्तयोः परमेश्वरे भक्तेभ्यो न दानं रिमतिसामान्यसिद्धं दृश्यते ननु तर्हि भक्तेः प
रमेश्वराधीनत्वाद्दुर्लभत्वे न साधनानां पराधीनत्वाभावात्सुलभार्थं दर्शितं। ननु कं भगवता मुकुंदेन। राजन्पतिर्गुरुरलं भ
गवान्यदूनां दैवं प्रियः कुलपतिः क्व च किंकरो वः। अस्त्वेवमंग भजतां भगवान्मुकुंदो मुक्तिं ददाति कर्हिचित्स्म न भक्ति
योगं। हरिभक्तिसुधोदये च प्रह्लादवाक्यं। मे ध्येयः सकलेष्टानामनिष्टानां च लब्धिर्वा। मोक्षप्रियः प्रियसखीनमिदं त्वं
यदा नरिया मोक्षांतं चतुर्वर्गफलदा सर्वदा सत्ता। कांक्षेपरां च दङ्क्षि भिन्नो वा ज्ञानभिन्नभक्तिमानिति। विस्तरस्तु भक्तिसिद्धांत

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा·श·
८६

इदानीं वैराग्यज्ञाननिरपेक्षायाः प्रेमभक्तेः संयोगेहूनां मुक्तिमनिह्नुतामपि केषांचित्स्त्रीणां पीडांनानां पराशरादिमुनीश्वरा
णामभिमतं भगवदानंदमत्यद्भुतलक्षणं मोक्षफलमाह कृष्णेति। योगयुक्तानामयं श्रीकृष्णोऽस्माकमुपपतिरिति शो
भनाध्यायिनीस्त्रियानन्यपरमेश्वरत्वस्य केवलं प्रेममात्रेण तेषां तासां नन्दीश्वर प्रेमभक्तानां तथापि पराशराद्यास्मुनीनां प्रे

कृष्णे योगयुक्तानामुपपतिस्तु धिया केवलप्रेममात्रात् नानारागिणीनां मुक्तजनमथाध्यायतीनां मुक्तं दंसा
नंदक्लेशयोगात्कृपितस्तु कृतः कृत्स्नशो दुष्कृतानां प्राहुः पाराशर्याद्या मुनिगणमणयो मोक्षमानंदसांद्रं ८७

ष्णमोक्षं दुःखाभावत्याहृत्स्वर्थमानंदघनं प्राहुरित्यन्वयः। पराशर एव पाराशरः स्वार्थेऽण् प्रत्ययो द्रष्टव्यः। यद्वा पाराशरा
द्याद्यास्साद्याः ननु देहारंभकादृष्टभोगमंतरेण कथं मोक्ष इति चेन्नत्राह मुक्तं दंध्यायतीनां मुक्तं दध्यानेन यस्मानंदः सान्द्रा
न्तस्तं वर्धिष्णुत्वसंयोगावाप्तिः क्लेशस्तु दुःखं तयोर्योगेन कृपितानि विनाशितानि सुकृतैः सह कृत्स्नशः साकल्येन दुष्कृतानि या

राम·
८६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सिद्धासनं । सुकृतमइति तृतीयार्थे प्रार्थविमुक्तिच्यमसीलितमद्र्यायोऽष्टध्यः । तद्ज्ञानैर्हेतुमाह गुरुदत्तानां स्वस्वरम
र्हिप्रकृतीनां लक्ष्मया द्वाराणाद्बहिर्निर्गतानामित्यर्थः । तदुक्तं श्रीकपिलेन भगवता । नैर्दर्शनीयावयवैरुदारैर्वि
लासहासेक्षितवामसूक्तैः । हृतात्मनोहृतप्राणांश्च भक्तिरनिच्छतो मे गतिमण्वीं प्रयुङ्क्त इति । तथोक्तं वैष्णवे । काचिद्दा
वमसवथस्यांतःस्थितात्द्वार्बहिर्गुरुर्तान्नयवेन गोविंदं दध्यौ मीलितलोचना । तच्चित्ताविपुलाह्लादक्षीणपुण्यचयात
दातदप्राप्तिमहादुःखविलीनाशेषपातका । चिंतयंती जगत्सूतिं परब्रह्मस्वरूपिणं । निरुच्छ्वासतया मुक्तिं गतान्या
गोपकन्यकेति । श्रीभागवते च । अंतर्गृहगताः काश्चिद्गोप्यो लब्धविनिर्गमाः । कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोच
नाः । दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः । ध्यानप्राप्ताच्युताश्लेषनिर्वृत्याक्षीणमंगलाः । तमेव परमात्मानं जार
बुद्ध्यापि संगताः । जहुर्गुणमयं देहं सद्यः प्रक्षीणबंधना इति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वेदाध्ययनादीनां तु किं साधनानां नामसाम्येपि तास्तु द्वाप्रेमणा केवलेनैव समगवत्सास्मि माइमो वेद इति न वेदाध्ययनं नापि योगः श्रि
नष्टन्नि निरोधः न गुरुकुले वासो गुरुशुश्रूषणं न तपश्चांद्रायणादिव्रतं न यागो ऽग्निहोत्रादिः न देहेन्द्रियादिस्तुः स्थूलात्मज्ञानं
न विषयभोगेभ्यो वैराग्यं मधुरिपोः शास्त्रतः शास्त्रविधिविहितं स्नानं मंत्रास्त्रियाः सांता गोपालबालाः तथापि श्रीकृष्णप्रेम्णा केवल
साधनेन हरिपदं हरेः स्वरूपं लेभिरे प्राप्ताः किं कृत्वा संसारपाशं संसारबंधनरज्जुं छित्वा कीदृश्यः श्रीकृष्णरागेण विवशाः पराधीनाः

नो वेदा नापि योगो न च गुरुसदनं निर्गतो नो तपो नापि यागो न ज्ञानं नो विरागो मधुरिपुमननं शास्त्रतो नास्त्रियास्ताश्छित्वा
संसारपाशं रतिरसविवशाः कृष्णविश्लेषमूढाः प्रेम्णा गोपालबालाः सपदि हरिपदं लेभिरे नारखुद्धा ९०

पुनः कीदृश्यः कृष्णस्य विश्लेषेण विरहेण मूढा विचेतसः तथापि तास्तु ह्या प्रेम्णा श्रीमद्भरषियाः तदुक्तं भगवता रामेण साई मधुरां प्र
णीते श्वाफल्किना मय्यनुरक्तचित्ताः । विशादम्भावेनन मे वियोगतीव्राधयोऽन्यं ददृशुः सुखाय । तास्ताः क्षपाः प्रेष्ठतमेन नीता मयैव
वृन्दावनगोचरेण क्षणार्द्धवत्ताः पुनरंगतासां हीना मया कल्पसमा बभूवुः । मत्कामा रमणं जारमस्वरूपविदो बलाः । ब्रह्म
मां परमं प्रापुः संगाच्छतसहस्रशः । ते नाधीतश्रुतिगणा नोपासितमहत्तमाः । अव्रतातप्ततपसो मत्संगान्मामुपागता इति ९०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ननु नित्यगोपालबालानामस्तु मुक्तिस्तु मनसा नित्यलीलावतारमित्यस्मिन्नूर्ध्वपदे नित्यां मे मथुरां विद्धि वनं वृंदावनं त
था यमुनां गोपकन्यास्तथा गोपालबालकानित्यादिना गोपीनां नित्यत्वश्रुतेः मथुरानां तासां मुक्तिरित्युच्यत इति चेत्

मुक्तिं कासांचिदासां हरिपदमविदां केवलज्ञानिनां लां कस्मोऽवादीस्त्रियाणां प
रमपदविदां दुर्लभां वल्लवीनां। वृंदारण्ये स्थितानां पतगमृगगवां स्थावराणां
नितरां माधुर्यसर्वधर्माऽस्त्यगतिर्महतः प्रेमभक्तेः प्रसादः ९१

परविरोधापत्तेरिति चेत् सत्यं तासां नित्यसिद्धानां न मुक्तिः साधनसिद्धानां कासांचिद् मुक्तिरित्याह कासांचिदिति आ
सां वल्लवीनां मध्ये कासांचिद् ज्ञानाधिक्यात् यथा श्रुतादि साधनसिद्धानां मुक्तिं कस्मोऽवादीत् कृष्णो न तु नित्यसिद्धानां राधादीनामि

87

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रा.गी.
८८

त्यर्थः। ननु यं नित्यानित्यविभागः कर्तृ इति चेन्नित्यं भेमुक्षुरं विशीत्यादिशा कायादत्ययाम सर्वासां तासां विधुत्वा
नित्यत्वव्याहृनिस्त्वद्वाक्यस्यासामान्य अनरूपेनेति माद्वः। तासां कीदृशीनां केवलं कृत्स्न शीतिं मजं नेया स्वासां आत्म
ज्ञानाद्यपेक्षां वारयति हरिपदमवि दांहरेः पदं स्वरूपं न विदंती ति तथा ताः मुक्तिं कीदृशीं परमपदं विदां ज्ञानिना
म पितुर्लभ्यां न केवलं तासामपि तु हृदारण्यनिवासिनां तदा नीलनानां मा तिरश्चां दृक्षाणां च प्रेम्णा मुक्तिं कृत्स्नाः स्वादी
दित्यन्वयः। अतः स्मृतिस्मृतिविहिता कर्मवैराग्यज्ञानात्म र्वस्मा द्वर्मात प्रेमनकैः अनाद्यागुरुमरोगारिष्ट त्यास्वर्य
मित्यर्थः। तदुक्तं भगवता केवलेन हि भावेन गोप्यो गावो नगा मृगाः। येन्ये मूढधियो नागाः सिद्धामामीयुरंजसे
ति। न यत्तमेवविधि हि त्वेवकारः स्मृत्यादिरोधात् स्मृतेः ज्ञामान्येवाच्यं श्रोतस्मार्त वैराग्य ज्ञानादौ तु जहं दासवनच
रगोपीदीनां ज्ञानाद्यनानाम विकारामावादिति ५१

राम
८८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ननु कथं श्रौतस्मार्तकर्मादिभिर्विनात्मज्ञानमात्रात्सिद्धिरित्याशंक्याह स्वाध्यायैरिति स्वाध्यायादिभिर्यत्नैस्तत्त्वमृतां प्राणिनां यो
लभ्यो न स भवति तं कथं नामरूपाभ्यां विमुक्तास्ताः कथं विरिंचिरित्यत्र यः ताः कीदृश्यः मदनजनितरागेण युक्तमादस्तेन संभ्रान्त
चित्ता यासां ताः कल्पयः ननु देवभूतानां तासां कथं ज्ञानमाचाकथं तत्सान्निध्यमित्याह स्वात्मसाध्यादिति वस्तुशक्तेर्वस्तुनः कथं स्वशक्ति
स्वात्मसाध्यात्स्वभावाद्यान्नहि वस्तुशक्तिर्बुद्धिमपेक्षते अयं चाज्ञानामपि तापहृतवादिति दृष्टं तत्र दृष्टान्तस्त्रापगानद्यायथा स्वावि

न स्वाध्यायैर्न यागैर्न विनरणगणैर्नापि योगैर्न सांख्यैर्यो यत्नैर्न वलभ्योऽसौ भवति तत्तु भृतामापगायद्वदृष्टौ । निर्दे
हाः कमलमीशं विरिंचिरतितरां नामरूपाद्विमुक्ताः स्वात्मसाध्याद्वस्तुशक्तेरपि मदनरसोन्मादसंभ्रान्तचित्ताः ८१
विमुक्तस्तद्वदित्यर्थः ननु कं भगवन्तं यं न योगेन सांख्येन दानव्रततपोध्वरैः व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि तां
नादिदंभयूखगुणं वद्धधियः स्वमात्मानमदस्तघेदं यथा समाधौ तन्योऽज्ञिनो येन यः अविद्यामुद्रनामरूपद्गतितथा व्यक्तिः
यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमिति ८२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भा·भ· ८९

इदानीं भक्तियोगनिरूपणोपसंहारव्याजात्सर्वबहूपदेशेन त्वं मां कर्तव्यतामाह ॥ आशास्तास्ता इति ॥ ताः
ताः कलत्रपुत्रवित्तविषयाश्च निखिलाः आशाः संसारवासना विहाय पूर्वं भक्तियोगं कुरुष्व इत्यन्वयः ॥ त

आशास्तास्ता विहाय त्वं तत्तत्समयकल्पिताः स्वप्नकल्पाः स्वल्पकाया मादृशेऽनल्प
श्रुतफलसमतां भक्तियोगं कुरुष्व । कृष्णे चेतोऽर्पय त्वं निखिलसुखमतामीश्वरं त
यत्तत्त्वं साधु सांख्यं संविदस्मिन्नमनमनुदिनं श्रेयसे श्रेयसेऽस्मै ॥ ७३ ॥

अपि कालविलंबो न कार्यः । शरीरादेर्नश्वरत्वादित्याह । अद्भुततरमिति । तामित्यादि । मां त्यागे हेतुमाह । अत्र च विहाय
याः कल्पिता अत एव स्वप्नकल्पाः स्वप्नसदृशा मिथ्याभूताः । न तु ताः यथा मनोरथविधियो विषयास्तु मनोमृषाः स्व

राम· ८९

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सहृष्टाः कदाचिदाह तथा संसारश्चात्मनः । न चात्मज्ञानवद्दत्यापासंचारयति । स्वल्पायामपि शिक्षिता सक्रियोगं वि
शिनष्टि । नाल्पं कृतं फलं यच्छति । तद्भक्त्या मोक्षं न स्वर्गं फलदा सर्वफलतेत्यादि । अमलाः निष्कामाः
सन्तः । सक्तेः प्रकारमाह । क्लेश सदानन्दे । तं मम सर्वं कदाचिदसज्जनेभ्यः दर्शयति । ईश्वरं कर्तुमकर्तुमन्यथा
वापि कर्तुं समर्थम् । अस्मै कृपामयः कीदृशो देहः प्राणकलत्रपुत्रादिभ्यः प्रियाय ममाश्रये सर्वस्य कामाय सर्वप्रि
यं मम त्वात्मनः स्फकामाय सर्वप्रियं मम वृतीति श्रुते ॥ गीताशास्त्रोक्तेः स्तुनाय ममगवान्स्मृतिरहस्यमुप
दिदेश ॥ सम्मनाम स व मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे इति ६२

सा·श्रा·
९९

महतामपि तत्क्रियायोगे उत्कृत्यानं दृढीकरोति। ब्रह्माद्या इति। हे आगमागमस्तं श्रीकण्ठं मम रक्ष इत्यन्वयः। मन्त्रो हे नमाहयपदपा
दारविंदं ब्रह्माद्या देवतानामिं द्राई सुराः श्रेमसन्न्यासेवं तेऽपापं तेन केवलं नेश्वपि तत्र स्थलस्थापद्मस्मापद्मालयाकुच
कलशेशेवते परमशीत नहे न सर्वसंतापविनाशकत्वात्माहुरागाध्रेमवतीमतीयदेशोयस्यपादारविंदस्य हृत्कालनंनोगं

ब्रह्माद्या देवतेन्द्राहृदयसरसिजे यस्य पादारविंदं [illegible] पद्मापि च कुचकलशेशानुरागादरेण शंभुर्भूर्हृष्टं
यत्नः सह गिरिसुतया मां [illegible] श्रीकण्ठ [illegible] मम मनसः आगमागमस्तं ॥ ९४

[illegible]

श्रीहरिमेवं विना संसारसागरान्निस्तारो नास्तीत्याह संसाराब्धिमिति। संसाराब्धिं निस्तरितुं हरे श्चरणंतरिं चेत्समास्र
यत्कृष्णयद्येवं वश्मि स्यन्तुपः। अब्धिसाम्याय विशेषणानि विषमयाये विषयाः शब्दादयस्त एव ग्राहास्तेषां दंष्ट्राभिः
करालं भयानकं कालव्यालेन वालं नयस्यन्तं कालसर्पप्रसक्त्वादनित्यमितिभावः। नितान्तं निर्व्ययाः कलत्रपुत्रादय

संसाराब्धिं विशालं विषमविषयग्राहदंष्ट्राकरालं कालव्यालप्रवालं नितान्त
निर्व्ययस्नेहपंकजालम् योषाभोगप्रवालं प्रबलपरिभवक्लेशशैवालमालं नि
स्तारं निस्तरीतुं हरिश्चरणतरिं चेत्समासंश्रयध्वम् ९५

तेषु स्नेहः पंकजालो यस्मिन् तं। योषाभोगः प्रवालो वैदूर्यमणिर्यस्मिन् तं। प्रबलाः परिभवक्लेशाः शैवालमाला यस्मिन् तं। त
महाब्धिमिह दुःखौघमपारं अर्णवमसत्वेशां षड्गुणक्रमस्तवेन निस्तीर्णं यन्ति। नवं हरेर्भगवतोमसृणनीयसंक्लिष्टं चेत्तु पंचसमस्तु नरडुस्तराणामिति
९५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

९०

ह्रि२

अधुनाध्यायोक्तानुवादपुरःसरं शास्त्रमुपसंहरत्येक इति। एको यस्त्वादिनारायणः सृष्टेः प्राक् स्थितः स विश्वं सृष्टवान्
एकः सजातीयभेदरहितः एको ह वै नारायणो देवो यस्मिन् लोका ओताश्च प्रोताश्च यस्येत्यत्र ज्ञानेनैः ज्ञेयो निरेको
नारायण आसीन्न ब्रह्मा नेशानो नापो नाग्नीषोमौ नेमे द्यावापृथिवी न नक्षत्राणि न सूर्य इत्यादिश्रुतेः। एको नारायणो

एको विश्वं ससर्ज त्रिगुणसहचरो जीवकर्मप्रभेदाः शेते शेषस्य तल्पे जलधिजलनिधौ नाभिनालाम्बुजस्थः। श्वे
तद्वीपे विकुंठे पितृवसति नरामादिनारायणोऽयः सोऽसौ श्रीदामदेवो व्रजतु विजयदानंदनः सन्नंद ९६

देवः सर्वं सृष्टं स्वमायया संहृत्य कालकलया कल्पान्ते इदमीदृशः। नारायणीयो मन्त्रः सर्वं संभवति जगत्स्थावरजंगमं
अक्षरं च क्षरं चैव सदसच्चैव नारद। तस्माद्यः परमात्मा हि स नित्यो निर्गुणः स्मृतः। स हि नारायणो ज्ञेयः सर्वात्मा पुरुषो हि
यः। न लिप्यते फलैश्चापि पद्मपत्रमिवांभसा। ब्रह्मरुद्रमहेंद्रार्कैः स्वभावः कालः कर्मैवेति भिन्नं पदाङ्कुः। स्वच्छादीनां कार

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

णं कारणत्वादेवं चैतन्यवदेकः स विष्णुरिति स्मृतेः। नन्वेकस्मात्कारणात्कथं विश्वकार्योत्पत्तिर्लोके हि घटादिकार्या
णामनेककारणत्वादर्शनादिति चेन्नत्राह। त्रिगुण महद्वरः इति। त्रिगुणं प्रधानं महद्वरं विष्णोरुपादानं तेन महीयान् य
स्य सः। अस्मान्मायी सृजते विश्वमेतदिति श्रुतेः। एकः स्वयं सन् जगतः सिसृक्षया द्वितीययात्मन्यधियोगमायया।
सृजत्यदः पाति पुनर्ग्रसिष्यते यथोर्णनाभिर्भगवान्स्वशक्तिभिरिति स्मृतेः। ननु विश्वस्रष्टुरीश्वरस्य वैषम्यप्रस
क्तिरिति चेन्नत्राह। जीव कर्म प्रभेदादिति। जीवानां शुभाशुभकर्मणां वैचित्र्याद्वैषम्यं न तु स्वतः परमेश्वरस्य। वैष
म्यनैर्घृण्ये न सापेक्षत्वादिति न्यायात्। यः प्रलयजलधौ शेते। यस्य नाभिनालाभिपद्मात् स्वयंभूर्ब्रह्मा पाद्मकल्पेऽ
भूत्। यच्छक्त्यविभक्तिपरिणामेनाद्वयोयोऽन्यः। श्वेतद्वीपे वैकुंठे पि स्थितो वसति। स एकोऽसावादिनारायणः। श्री

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वासुदेवो वसुदेवनंदनः सनत्कुमारसंहितायां वृंदावनादौ नंदत्यन्वयः। नारायणीये नारदं प्रति श्वेतद्वीपपतेः श्रीनारा-
यणस्य वाक्यं। संध्यांशे समनुप्राप्ते त्रेतायां द्वापरस्य च। अहं दाशरथी रामो भविष्यामि जगत्पतिः। यदुवंशे भवि-
ष्यामि कृष्णः कंसादिघातनः। कर्माण्यपरिमेयानि चतुर्मूर्तिधरो ह्यहं। कृत्वा लोकान्गमिष्यामि स्वानहं ब्रह्मसंज्ञि-
तानित्यादि। यस्यां समशिरायानस्य योगनिद्रां विनन्दतः। नाभिकंदात्तु सादासीद्ब्रह्मा विश्वसृजांपतिः। तस्माद्भवंत-
मनवद्यमनंतपारं सर्वज्ञमीश्वरमकुंठविकुंठधिष्ण्यं। निर्विण्णधीरहमुह वृजिनाभितप्तो नारायणं नरसखं शरणं
प्रपद्ये इत्यादिवाक्यैर्नारायण एव सर्वलीलावतारी स एव श्रीकृष्णः सर्वोपास्य इत्यर्थः ७६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भगवतः स्वेच्छः समर्थस्य केवलं नकपालेशो न यथा कथंचित्सामर्थ्यमभिव्यनक्ति यस्मिन्नियं श्रीकण्ठो दशानव
दनः सहस्राननः शेषः चतुर्वक्त्रदेवो ब्रह्मा नाकी इन्द्रादिः पिनाकी शिवः इति रोहितार्थमन्यत् [illegible]

यस्यात्र [illegible] न शक्तो दशशतवदनः कश्चतुर्वक्त्रदेवः को नाकी कः पिनाकी क्व
च निगमगणः क्वापि वाणी वराकी क्वाहं मूको वराकस्तदपि नवकपालेश
भाजो भ्रूपरिः पादाम्भोजे [illegible] ॥ ९३ ॥

[illegible] दशशताननस्सहस्राननः शेषः
[illegible] ॥ ९३ ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा. स.
७२

स्वकृतग्रन्थे सिद्धान्तानामसम्मतत्वे पिस्त्रप्योङ्गत्वं परिहरति सिद्धान्तमिति। सिद्धान्तं शास्त्रकस्य विवरणटीकायां च संगृह्णे हेतुः।
शानरागद्वेषादिभावल्पर्यस्यापन्नाविहेतुर्यतो महान्तमिति। स्वबलेनेहेतुः कर्कशानां कठिनानां दुरूहाणां शास्त्राणां वाङ्कल्पनात्सुप
दमनुक्रमणं संवतीतिक्रियोन्नेयात्तु गमस्यत ७८ शेममर्थं प्रार्थयते। कोऽपि मुमुक्षुरसिति। ईदृक्प्रकृत्यादिप्रसावरणपुरुषाणां
सिद्धान्तेसावतानां स्ववलनसिद्धमनागल्पमेधावशानां प्रेक्षावतः क्रमं शास्त्रकविवरणेनापि शास्त्रमहान्तः। कां
तारेककर्कशानां निगमगणविदांगन्तुं तां चागमानां भाषया वाचस्पतीनां वचनमनतुपदं क्रियतमतेहशानां ७८ को
ऽपि मुमुक्षुरमी हृदमपि यद्दुरेतुन्निकाङ्क्षमाणं यस्यां तं नेमहि मायपुरमलधियो ब्रह्मरुद्रादिदेवाः दुर्लभ्यं द
र्शनानां सगानितन्तु स्तनं सक्किमान्ना स्वलक्ष्यं नमितवृक्षोक्षः मियाचे प्रतिदिनमनिशं प्रेमसार्थं तमर्थं ७७
निक्षाः निसृक्ष्म कीटविशेषस्तदण्डवत्प्रमाणं परिमाणं यस्य स तत्परमाणुपरिमाणमित्यर्थः। तदुक्तं फलपतयस्ववतेनय
पुरं तमतं नतयानन्तु मावरणाः। रवेर्वरश्मिभिर्वाणिवयमाम्हृदयक्रान्तयस्वपिहितकेलं त्यतन्निरमनेनसमवन्निघ्नात्मनि। प्रेम
सार्थं प्रीतिसमृद्धं कीदृशं तमर्थं परमपुरुषार्थमानन्दस्वैवपरमपुरुषार्थत्वादानन्दो ब्रह्मेति श्रुतानामन्तिस्मृतेः ७७

रा. म.
७३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रा.स्त.
९४

ग्रंथसमाप्तावर्थेनामिषेण मंगलमाचरति । निःसंसारदुःखिताज्ञानिभिर्द्विरेणपाणिनिविशेषामासानिदृष्टयानि श्री
सीतागोपिदारायस्यसः । आसीलंकष्टंतुःवंदारयतिमितिनत्नीमितथासः १०० इति श्रीराघवेंद्रसरस्वतीविरचि

निःसंसारोऽविकारोऽद्भुतसुविलसितकामानाःशालीरदारः श्यामाकारः कुमारः सदादिकरुणयासम्यगामीलदा
रः श्रानंदाकारसारस्मितमिरहतहृदशांसर्वसंसारहारीति स्नाराया विरलांमसनयनपद्मेकृसुचंद्राचता
रः १०० ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीब्रह्मसरस्वतीशिष्य श्रीराघवेंद्रसरस्वतीवि
रचितमद्वैतसिद्धांतशतकं संपूर्णं श्रीमद्यादवनीयामानांपुस्तकमिदं श्रीनंदनंदनोजयति

तायां मद्वैतसिद्धांतशतकटीकायां सिद्धांतकल्पवल्ल्यां सरावल्लिविचारो नाम चतुर्थस्तबकः समाप्तोऽयं ग्रंथः ॥ ॥

राम.
९४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

९३

94

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham